आत्मा वा इत्याद्युत्तरग्रन्थेन ब्रह्मविद्यैवोच्यत इति परिशेषयितु-मुत्तरमनुवदति । परिसमाप्तिमिति यच्च यावच्च कर्मजातमपरब्रह्मविज्ञानं च श्रुत्यन्तरेषु श्रुतम् तत्सर्वमत्र नोक्तमित्यत आह । एषेति । फलतः उक्तमित्यर्थः । इदानीं पूर्वपक्षं दर्शयति ॥

* * * *

End :

अवतु वक्तारमित्यभ्यासोऽध्यायपरिसमाप्त्यर्थः । द्वितीयारण्यक परिसमाप्त्यर्थकश्च ।

Colophon :— इति साधारणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऐतरेयारण्यकाण्डे द्वितीयारण्यके सप्तमोऽध्यायः

या ब्रह्मविद्यातीर्थेन जीवत्वादि मलं मम ।
ममार्ज सा विजयते परिपूर्णा गुरोः कृपा ॥

---

8. जैमिनिगृह्यसूत्रम्.

Beginning :

अथातोऽग्निं प्रणेष्यंन् प्रागुदक् प्रण(व)णमभ्युक्ष्य स्थण्डिलं लक्षणं कुर्यान्मध्ये प्राचीं रेखामुल्लिख्य उदीचीं च संहितां पश्चात्तिस्रो मध्ये प्राच्यः अभ्युक्ष्याग्निं प्रतिष्ठापयेत् भूर्भुवस्सुवरिति लक्षणावृते(त्यै)षां सर्वत्राथ पाकयज्ञान् व्याख्यास्यामः । हुतोऽहुतः प्रहुतः प्राशित इति तेषामेकाग्नौ होमः ॥

* * * *

End :

यथा समुत्थितं यन्त्रं यन्त्रेण प्रतिहन्यते ।
तथा ग्रहोपसृष्टानां शान्तिर्भवति दारुणम् ॥

नादिशेत्तपसायुक्तं नादिशेद्देवमाश्रितम् ।
न च वेदान्तगं विप्रं वृ(द्धां)त्तान्तां (ना)रीं पतिव्रताम् ॥
अहिंसकस्य दान्तस्य धर्मार्जितधनस्य च ।
(क्रिया)तिनियमस्थस्य सदानुग्राहका गृहाः ॥
ग्रहा गावो नरेन्द्राश्च ब्राह्मणाश्च विशेषतः ।
पूजिताः पूजयन्त्येते निर्दहन्त्यवमानिताः ॥

आहत्य खण्डद्वयम् । मुख्यखण्डाः (34) । जैमिनिसूत्रं समाप्तम् जैमिन्याचार्याय नमः । श्रीसद्गुरवे नमः ॥ वेङ्कटनाथमहादेशिकाय नमः। श्रीनिवासमहायज्वने नमः । बालाग्निहोत्रिणे नमः ॥

---

9. जैमिनिगृह्यकारिका.

Beginning :

श्रीमान् मरकतश्यामो वेणुना भूषिताधरः ।
चकास्तु हृदि गोविन्दो मदीये वल्लवीप्रियः ॥
नगार्जुनग्राममहीशिरोमणिः
यस्तामदुग्धोम्बुधिमन्थमन्धरः ।
बाहु(प्राहु)श्च यं वेङ्कटनाय(थ)दीक्षितं
तं यायजूकं मुनिमानतोऽस्म्यहम् ॥
कावेरीतोयपानादसकृदपि सवे सोमपानाच्च सम्यक्
श्रीरङ्गक्ष्मापतेर्यत्तिलकितवदनं तस्य सन्दर्शनाच्च ।
अश्रान्तं शुद्धचेता गुरुपत(द)नुतधीः ज्ञातशास्त्रार्थतत्व
श्श्रीमान् बालाग्निहोत्री विशत(द)यति मुनेर्जैमिनेर्गृह्यकर्म ॥
विनियोगो हि मन्त्राणां स्पष्टं गृह्यं प्रकाशते ।
अथ क्रियाक्रमं वक्ष्ये मन्त्रादींश्च कचित् कचित् ॥

प्रथमं पाकयज्ञानां पार्वणः कथ्यतेऽधुना ।
निषेकादिस्म (श्म)शानान्तं चत्वारिंशत् क्रिया द्विजाः ॥
पाकयज्ञा हविर्यज्ञाः सोमयज्ञाश्च तास्मृताः ।

* * * *

End:

आत्माग्न्योर्मध्यभागे तु वायसादिर्बलिं क्षिपेत् ।
अग्नेर्दक्षिणतो दद्यात् चित्रादिबलिपञ्चकम् ॥
शेषं तन्त्रं समाप्याथ प्रक्षाल्याचम्य वाग्यतः ।
अनुज्ञाप्य द्विजान्नत्वा फलदानं समाचरेत् ॥
ताम्बूलचर्वणं कृत्वा दद्याद्गां गुरवे शुभाम् ।

---

10. सिद्धान्तकौमुदीव्याख्या बालमनोरमा ॥

Beginning:

स जयति दिव्यनटेशो नृत्यति योऽसौ चिदम्बरसभायां ।
पाणिन्यादिममुनयो यस्य च दयया मनोरथानभजन् ॥
अस्तु नमः पाणिनये भूयो मुनये नमोऽस्तु वररुचये ।
किंचास्तु पतञ्जलये भ्रात्रे विश्वेश्वराय गुरवे च ॥
व्याख्याता बहुभिः प्रौढैरेषा सिद्धान्तकौमुदी ।
वासुदेवस्तु तद्व्याख्यां वष्टि बालमनोरमां ॥

मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि प्रथन्ते वीरपुरुषाणि भवन्त्यायुष्मत्पुरुषाणि चाध्येतारश्च वृद्धियुक्ता यथा स्युरिति वृद्धिसूत्रस्थभाष्यादिस्मृतिसिद्धकर्तव्यताकं मङ्गलं शिष्यशिक्षायै ग्रन्थतो निबध्नन् प्राचीनग्रन्थैरगतार्थतां विषयप्रयोजनसंबन्धाधिकारिणश्च सूचयन् चिकीर्षितं प्रतिजानीते मुनित्रयमिति श्लोकेन ॥

End :

गौरादित्वात् ङीषिति युक्तं पुनहतिसाहसस्य स्त्रीष्वेव संभवात् स्त्रीलिंगमेवोदाहृतं ॥ पुनहतीति ॥ द्वित्वाभावे ॥

---

11. सिद्धान्तकौमुदीव्याख्याने लघुशब्देन्दुशेखरे उत्तरार्द्धे वैदिकप्रकरणम् ।

Beginning :

अथ वैदिकेषु विशेषमाह । छन्दसि पुनर्वस्वोः । पुनर्वस्वोर्द्वे तारे लोके त्विति उद्भूतावयवभेदेन समुदाये रूढत्वादिति भावः ॥

End :

रत्नधानममिति रत्नधातमम् तेन वैकाक्षरीकृतोदित्यस्योदाहरणं ॥ अन्नलाभवन्तीति अन्नलाभ इति शब्दविशेषानुगुणमिति तत्तद्भाष्यकृत इति सर्वेष्टसिद्धिः ॥

शब्देन्दुशेखरः पुत्रो मञ्जूषा चैव कन्यका ।
स्वमतौ सम्यगुत्पाद्य शिवयोरर्पितौ मया ॥

शब्देन्दुशेखरस्सोऽयं फणिभाष्योक्तिभूषितः ।
सतां हृत्कमलेष्वास्तां यावच्चन्द्रदिवाकरौ ॥

Colophon :— इति श्रीमदुपाध्यायोपनामकशिवभट्टसुतसतीगर्भजनागेशभट्टविरचिते लघुशब्देन्दुशेखराख्ये सिद्धान्तकौमुदीव्याख्याने उत्तरार्द्धं समाप्तम् ॥

---

12. उदारराघवकाव्यम् .

Beginning :

अस्ति प्रशस्तः प्रकृतेः परस्ता
दाद्यः पुमान् केवलचित्स्वरूपः ।
स्वानन्दपूर्णस्सदसत्प्रपञ्च
बाह्यान्तरव्याप्तबहुप्रकारः ॥

अनन्तशक्तिं तमनन्तकोटि
ब्रह्माण्डभाण्डावृतरोमरन्ध्रम् ।
समाधिभेदैरपरोक्षयन्तो
भजन्ति नित्यं हृदि नित्यमुक्ताः ॥

* * * *

End :

तं तथेति भरतं च गुहं च प्राग्विसृज्य गुरुमप्यभिवाद्य ।
ज्ञातिमातृसखिनागरबन्धून् प्राञ्जलिर्व्यसृजदश्रु च रामः ॥

Colophon :—इति सुखस्य स्वमाकलितरघुनाथदत्तवरप्रसादसहजसाहित्यश्रीशाकल्यपदाङ्कमाधवसुधीतनयकविमल्लमल्लयाचार्यविरचिते उदारराघवे सप्तमस्सर्गः ॥

* * * *

मा चरो वनमदः प्रमदस्त्वं मध्यमात्तु युवयोस्तनुमध्या ।
सायुधेन भवता भवितव्यं सानुजेन गिरिसानुचरेण ॥

* * * *

12*a*. उदारराघवव्याख्या.

Beginning :

वागीश्वरीं भजे वाचां विभूत्यै विश्वतोमुखीम् ।
वाचो वाल्मीकिमुख्यानां प्रवृत्ता यत्कृपालवात् ॥
तमालश्यामलं रामं राजीवदललोचनम् ।
नमामि नयनानन्दं राजीवदललोचनम् ॥
शाकल्यमल्लभट्टेन कृतस्य च नशास्य (?) ।
उदारराघवाख्यस्य काव्यस्य महतोऽधुना ॥

गाधिगोत्रसमुत्पन्नमायिसूरितनूभुवा ।
लिख्यते बालबोधाय व्याख्या चौण्डिविपश्चिता ॥

पूर्वमाद्याख्यभावेन वान्तितं मल्लिधीमतः ।
काव्यं व्यद्योत(य) यस्माट्टीका प्रद्योतनी ह्यसौ ॥

यथामूलं यथापेक्षं यथान्वयमिह स्फुटम् ।
मया विरच्यते व्याख्या हृद्येयं विदुषां सदा ॥

एषा व्याख्या च सुधियः प्राप्य साध्वी रसोज्वला ।
भूयाद्दुग्धोदधिं यद्वत् क्षारं क्षीरायते जलम् ॥

असाधुतां साधुतां च नतानानां समालिखम् ।
आलोच्य सन्तो युष्माभिस्तत्सा(धू)भत् क्रियतान्तराम् ॥

अथाखिलकलुषापहरमुदारराघवं नाम महाकाव्यं चिकीर्षुस्तदादावाशीर्नमस्क्रियावस्तुनिर्देशो वापि तन्मुखमिति न्यायादनपायं वस्तुनिर्देशः ॥

अस्तीति प्रशस्तः सजातीयविजातीय(स्व)गतभेदशून्यः। केवलं एकं चित् ज्ञानमेव स्वरूपमात्मा यस्य स तथोक्तः ज्ञानघन इत्यर्थः॥

End :—

आविहतमकुण्ठितं हविर्होतव्यं यस्मिन् तस्मिन् अविहतहविः सन्तन्तौ संपूर्णे सति महाऋषिः कौशिको हर्षं सन्तोषं प्राप ॥ स्रग्धरावृत्तम् ॥ म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयमिति ॥ 103 ॥

Colophon :—

श्रीमन्मायिमहासुधीनतनुभुवः श्रीचौण्डिसूरेः कृता
वज्ञानां हृदयान्धकारदलनात् प्रद्योतनी ।
(नित्यं)भास्वदुदारराघवमहाकाव्ये नित्यो(सर्गो)ल्लस
द्व्याख्याने विदुषां मनोहरतमः सर्गो द्वितीयोऽगमत् ॥

13. नाथमुनिविजयः.

Beginning:

श्रीशश्रीघ्रतनाधिनाथशठजिन्नाथाब्जदृग्राघव
श्रीमद्यामुनयोगिपूर्वयतिराट्गोविन्दभट्टारकान् ।
सेवे वेदशिरोमुनीन्द्र त्कृष्णान् जगद्देशिक
श्रीशैलाधिपभोगिसुन्दरवरान् हृद्यान् गुरून् ॥

श्रीनारसिंहगुरुसेवितवेङ्कटार्य
रतातगुरून् गुणानवद्यान् ।
श्रीश्रीनिवास वेङ्गलशिंगरार्य
श्रीवेंगलार्यनरसिंहगुरून्नमामि ॥

मात्मेशं श्रीतिर्मलगुरुं नमः ।
श्रीतातं तिर्मलार्यं च श्रीमत्तातगुरुं सदा ॥

श्रीवेंकटेशपदपद्मयुगं नमामि
श्रीदिव्ययौव्वतनिरीक्षणभृङ्गकान्तं ।
कान्त्यास्पदं भुवनदीप्तिकरं प्रकामम्
कामानुरूपफलदं शठजित्कटाक्षम् ॥

यद्वीक्षणश्यामरुचौ मणीन्द्रे हरिस्तदा शङ्कितमानसोऽभूत् ।
तद्भावमुद्वीक्ष्य शुचिस्मितां तां राजीवनेत्रीमहमाश्रयामि ॥

सुदर्शनमहं वन्दे सुदर्शन ।
विकर्शनमसाधूनां दर्शनं तत्त्वसंपदाम ॥

उत्तारकं प्रणमतां
संजातभक्तिततिकोज्वलदेहतं हि ।
हंसालिसेवितमतीव सुगन्धजुष्टं
श्रीमद्यतीन्द्रपदपद्मयुगं भजेऽहम् ॥

पादारविन्दयुगलीतटिनीमिह
श्रीमद्यतीन्द्रमहतीमवगाहिषीय ।
सत्तीर्थसङ्घपरिसेवित
शुचयविश्वजनीनवीचीम् ॥

प्रपन्नजनभूषणं प्रकृतिदोषसंशोषणं
प्रतारकविभीषणं विद्वेषिणम् ।
प्रबद्धगुरुतोषणं प्रणतबृन्दसंपोषणं
नमामि शिरसा गुरुं नृहरिसूरिवर्यं पदे ॥

* * * *

इति श्रीमन्मैत्रेयगोत्रसुधोदधिसुधाकर श्रीकृष्णमाचार्यसूनोस्सुदर्शन-प्रसादावगतसर्वशास्त्रस्य रामानुजदासस्य कृतिषु श्रीनाथमुनिविजये प्रथमोल्लासः ॥

End:

धर्मजभीमार्जुना इव सकलयायजूकसंराध्यतया विध्यर्थवादमन्त्राः कलितशास्त्रप्रतिपाद्याः आहवनीयगार्हपत्यदक्षिणाग्नय इव विशिष्टाद्वैत-सिद्धान्तप्रवर्तकतया प्रपन्नजनकूटस्थाः पराङ्कुशपरकालयतिवरा इव ज्ञानभक्तिविरक्तिसंपन्नाः श्रीमत्तातयाचार्यतिरुमलार्यतातयाचार्याः स्वा-श्रितमादृग्जनरक्षकाः सततं प्रतिभान्ति ।

एतेषामार्यवर्याणां पुत्रपौत्रश्रियस्सदा ॥
वर्ध(न्तु)न्तां सह शिष्यैश्च वेदान्तद्वयतत्पदैः ॥

---

14. बाणासुरविजयचम्पूः

Beginning:

श्रीलक्ष्मीकान्तनाभीकमलमधुझरीलोललोलम्बमाला
झङ्कारस्सम्पदोघं दिशतु विधिचतुर्मुख्युदीर्णागमानाम् ।

तादात्म्यं ख्यापयन् यस्स्वरनिकरमयः पादपद्मानताना
मिन्द्रेशानादिदेवप्रवरपरिषदां कामितार्थामरद्रुः ॥ 1 ॥

अत्युत्साहनटन्महानटजटाजूटाटवीसंभ्रमा
द्गङ्गातुङ्गतरङ्गसङ्गरपटुप्रौढोक्तिकृद्वैभवा ।
श्रीभर्तुः कुहनाहयस्य नितरां लोकत्रयोज्जीवनी
ह्येषा दोषविनाशिनी विजयतामास्माकजिह्वाञ्चले ॥ 2 ॥

कृतनतमहाभूम्ने सीम्ने प्रगल्भगुणश्रियां
म मयमहादाम्ने नाम्नेप्सितार्थसुरद्रुणा ।
नतजनबुधस्थेम्ने साम्नेज्य शेषधराधर
क्षितिपसद्गुरोधाम्ने नमः करवारुहैः (महै) ॥ 3 ॥

वरनीलपद्मरागच्छुरितं शङ्खनिनदम् ।
कच्छपसमपदनूपुरमीडीय मुकुन्दकुन्दरदनायाः ॥ 4 ॥

पदत्राणं त्राणं दिशतु मम रङ्गक्षितिपते
र्यदिन्द्रेशानाम्भोजनि (मुख) शिरस्त्राण (मजनि) ।
कलौ लोकांस्त्रातुं शठरिपुमिषाद्यत्समुदभू
द्यतो वेदः स्वार्थं दिशति सकलेभ्योऽपि भुवने ॥ 5 ॥

त्रय्यन्तार्णवमप्रमेयविभवं सत्तर्कसंग्राहित
प्रौढौ हीनगुणस्फुरन्मतिमहामन्थानसन्धानतः ।
श्रीलाभाय विमथ्य तत्वसुधिया रक्ताम्बुदान्प्रीणयन्
जीयादक्षतशासनः क्षितितले रामानुजाख्यो मुनिः ॥ 6 ॥

कल्याणानि तनोतु कोपि कुमतिव्रातान्धकारच्छटा
प्रत्यूषोदितवारिजप्रियसखप्रौढप्रभावाञ्चितः ।
माद्दग्भक्तचकोरमोदकलनाराकानिशानायको
द तलचन्द्रिकासमरूपः श्रीवेङ्कटेशो गुरुः ॥ 7 ॥

प्रपद्ये श्रीशेषाचलरमणघण्टावतरणं
प्रपन्नानां चिन्तामणिमतिदयालुं शमनिधिम् ।
त्रयीचूडामार्गाम्बुजविभवमार्ताण्डमनिशं
श्रितानां कल्पद्रुं कविकथककण्ठीरवगुरुम् ॥ 8 ॥

वाधूलवंशविधुराधूतकाममतिसाधूपकारचतुरः
स्वादूक्तिगन्धततिकाधूपिताश इह पादूपसेवकनृणाम् ।
बन्धूपमस्सुगुणसिन्धून्नतः कल(श)सिन्धूर्मितुल्यसुयशाः
वाचां ददातु मम मोचारसां स वरदाचार्यदेशिकमणिः ॥ 9 ॥

तर्काकूपारशब्दाम्बुधिनिगमवचस्तन्त्रपारं गतानाम्
जिष्णुर्जि(र्व)ष्णोः* परत्वप्रकटनजनितास्तोककीर्तिप्रचारः ।
दृप्यद्दुर्वादिदन्तावलकरटसृणीभूतकीर्तिर्विरक्ते
रावासो भावुकं नः कलयतु वरदाचार्यवर्योऽतिवेलम् ॥ 10 ॥

श्रीमत्कन्दालवंशाद्भुतकलशपयोराशिराकासुधांशु
स्तर्कश्रुत्यन्तमीमांसकमततधीः दृप्तदुर्वादिसिंहः ।
लोकैकौन्नत्यदीव्यत्तिरुमलतिलकाण्णार्यकारुण्यलब्ध
श्रीभाष्यार्थस्सुखं नः कलयतु जनकः श्रीनिवासार्यवर्यः॥11॥

क्षोणीकर्णभवादिसत्कविपदाम्भोजे चरन्मानसाः
एका   र्यतिचिन्तनश्रमपरान् गाम्भीर्यदूरस्थितीन् ।
क्लृप्तद्वित्रिपदान् मुधा कवयतो निर्गन्धपुष्पायितान्
भङ्क्त्वा भङ्क्त्वा मुदारकाव्यरचनाप्रौढाः प्रवर्तामहे ॥ 12 ॥

कन्दालान्वयकल्पभूजकुसुमश्रेणीभवत्कीर्तिना
विद्वत्कर्णमधूलिकाद्भुतसुधाधारालसत्सूक्तिना ।
श्रीनिवासार्यतनूभवेन विदुषा श्रीवेङ्कटाख्यात्मजा
क्लृप्तो बाणजयाह्वयो विजयतामेष प्रबन्धश्चिरम् ॥ 13 ॥

सकलजगदेकमूर्तौ कल्याणगुणौघदुग्धवाराशौ ।
संगतहृदयो विद्वान् दूरे नितरां परस्वभावोक्तेः ॥ 14 ॥

जडमपि मां सज्जयते पुरुषोत्तमपरमतत्वपरशक्तिः ।
गिरिसारघनं स्थिरमपि निभृतमयस्कान्तशक्तिरिव चलने ॥ 15 ॥

ईशानां परमेश्वरश्रुतिगिरां नेतारमाचार्यम
प्याद्यं सर्वमखेशितारमधुना तुष्टूषुरासं हरिम् ।
वाजिग्रीवभवन्मुखाम्बुजगलल्लालासुधासेचनैः
वाणीं शोधय मामिकां नरपरिष्वङ्गे ङ्गोचिताम् ॥ 16 ॥

पद्यैः केवलतां गतैरलमलं गद्यैरपद्यैर्मनां
हृद्या सैव हि सूक्तिरेतदुभयारब्धा मया भाष्यते ।
भूषावस्त्रगुणोज्ज्वलापि ललना तारुण्यलावण्ययो
र्योगादेव हि कामिनामतितरामानन्दकन्दायते ॥ 17 ॥

End :

न शक्तिर्नैपुण्यं न च सकललोकादिकलनं
न वा काव्यज्ञस्याद्भुतललितशिक्षागतिरपि ।
तथापि श्रीविद्वद्वरचरणरेणोर्महिमतः
कृता जीयाच्छ्रीवेङ्कटबुधकवेः सूक्तिसरणिः ॥

चोरैरेषा ह्रीयताम्नाम वाणी(का) शानो हानिर्ग्रन्थसन्दर्भभाजाम् ।
यः तः(?)पुरात् केचिदार्ताः किं चिद्वित्तं गृह्णते किं ततः स्यात् ॥

जीयाच्छेषधराधरेन्द्रमकुटीरत्नं श्रियः कामुकः
जीयाद्भाष्यकृदुज्ज्वलः शुभगुणै रामानुजः संयमी ।
जीयाद्वेदवतंसदेशिकगुरुः सिद्धान्तचूडामणिः
जी(या̣दा) हिमरश्मितारकमिदं रामानुजीयं मतम् ॥

बाणासुरविजयः समाप्तः ॥

हारीतान्वयशुक्तिमौक्तिकमणिर्विद्यानिधिस्सन्निधिः
वेदान्तार्यगुरुः सगर्व   बादीशकण्ठीरवः ।
अस्मिन्मानसपङ्कजातरसिकः ताद्भाव
अस्तोकाय शुभाय सूरिजनतामान्योऽण्णयार्यात्र(त्म)जः ॥

Colophon :— इति श्रीमद्वाधूलकुलकलशपाथोनिधिराकासुधाकरसर्वतन्त्रस्वतन्त्रोभयवेदान्ताचार्यवरदगुरुवरकरुणाकटाक्षलब्धश्रीभाष्यार्णवतात्पर्य   तदनुग्रहग्राहितपाणिनीयोदयनीयजैमिनीयादिसंप्रदायेन श्रीमत्कन्दालकुलतिलकचतुस्तन्त्रपारीणदिवाप्रदीपबिरुदाङ्कश्रीश्रीनिवासार्यतनयेन सहजविनयेन सुरसिद्धगिरिनगरवास्तव्येन नव्यदिव्यगद्यभव्यसाहितीसम्प्रदायपारदृश्वना वेङ्कटार्येण कलिते बाणासुरविजयाह्वये षष्ठोल्लासः ॥

---

15. लक्ष्मीस्वयंवरनाटकम्.

Beginning :

इति निष्क्रान्तास्सर्वे ॥ प्रवेशकः ॥ ततः प्रविशति शेषः ॥ सबहुमानम्

चित्रं कदाचन कदाचन केलिशय्या
पीठं कदाचन कदाचन पादुका च ।
भूत्वा भजामि यदहं पुरुषोत्तमं त
न्मत्तोऽस्य कः प्रियतमः परिचारकेषु ॥

मत्कृते न किंचिदपि गोप्य   सम्मुहस्यम् ।
यदायं निर्वर्तितसमुद्रमथनकृत्यो निवृत्तस्तदैव मद्भोगपर्यङ्कतल्पे न्यस्तशरीरस्समुद्रकन्यकादर्शनोल्लसित   सूचितवान्

*   *   *   *

End:

समुद्रः ॥

यत्संजीवयितास्म्यहं दिविषतां(दां) दत्वा समग्रां सुधाम्
दातॄणां प्रथमोऽस्मि यद्बलभिदे कल्पद्रुमादीन्दिशन् ।
कन्यारत्नसमर्पणेन भवते प्राप्तोऽस्मि यन्मान्यतां
सर्वं तद्भवतैव मे किमपरं श्रेयो हरे दित्ससि ॥

तथापीदमस्तु भरतवाक्यम् ॥

पुष्णीतात् पयसा कवेरतनया भूमिं सवित्री यथा
श्रीरङ्गाख्यमिदं च तत्पुलिनगं दिव्यं पदं वर्धताम् ।
देवश्चात्र सह श्रिया वितरतु श्रेयोभिवृद्ध्यै नृणाम्
भूयासुस्सुधियोऽप्यमुष्य महिमास्वादात् सदानन्दिनः ॥

किञ्च ॥

यन्माता वरदा यदीयजनको रामानुजार्यो महान्
यद्भ्राता श्रुतसम्पदा गुरुतरो जन्या कनीयानपि ।
श्रीकृत्याधिकृतेषु यः परिवृढः श्रीरङ्गधाम्नः प्रभोः
वासिष्ठाश्रमभूषणं विजयतां श्रीश्रीनिवासः कविः ॥

इति निष्क्रान्तास्सर्वे ॥

Colophon:— इति वासिष्ठाश्रमगरिष्ठस्य काश्यपकुलतिलकस्य श्रीरङ्गनाथश्रीकृत्यकारधौरेयस्य रामानुजसर्वक्रतुनन्दनस्य श्रीनिवासचतुष्कवीन्द्रदासस्य कृतिषु लक्ष्मीस्वयंवरं नाम नाटकं संपूर्णम् ॥

---

16. चन्द्रकलापरिणयः.

Beginning:

पार्वत्याः प्रणयप्रसन्नमनसः प्रीतिं प्रसूतेतरां
देवो यः श्वशुरैकमित्रमचलं चापात्मना मानयन् ।

धत्ते चन्द्रकलानुरञ्जनधिया
सश्श्रीकान्तशरश्शुभाय भवतूत्तुङ्गाय गङ्गाधरः ॥

एषा द्वाविंशतिपदा नान्दी ॥ नान्द्यन्ते सूत्रधारः ।

सप्रश्रयम् ॥ पशुपतिनापि गृहीतां ताण्डवनृत्तकलां प्रथयन्तः ।
कोहलमुख्या जयन्तु मुनिवर्याः ॥

इति पुष्पाञ्जलिं विकीर्य पञ्चषट्पदानि गत्वा

*   *   *   *

स जयति नरसिंहकविर्यत्कवितास्वादमुदितहृदय____________ ।
________________ मपि सुहृशामादरपदमीषदपि नवं तनुते ॥

पारिपार्श्वकः ॥ आस्स एव । यः किलाभिनवपरशिवावतारस्य शिवरामसुधीमणेस्तनयः शास्त्रसाहित्ययोरपि____________________

________________इति प्रतीतः । यत्र खल्वयं प्रौढकवीनां द्राक्षाक्षौद्रयोरुक्तिप्रत्युक्तिरूपो वाग्विलासः ॥

सूत्रधारः । कथमिव ।

पारि ॥ द्राक्षे किं वलसे वने वद ननु क्षौद्र त्वमप्यत्र किं
लज्जेऽहं नरसिंहसूरिकवितामाधुर्यतस्याप्यहम् ।
मित्रं नः क्व मरन्द एष कमले त्रिस्रोतसस्तत्कथं
तद्वाग्वेग______________ लीनेति हि श्रूयते ॥

एषा प्रश्नोत्तररूपा वाक्केलिः ॥

वाक्केलिः कथ्यते प्राज्ञैः उक्तिप्रत्युक्तिरूपिणी ।

सूत्र ॥ अये किमिदं विस्मृतं भवता । यत्किल कृतिना य____
____________________________वर्णितं सकलकलाकुशलमतिना सरसकविचक्रवर्तिना काशीपतिना सुधीमणिना ॥

पारि ॥ कथं विस्मर्यते । इदं हि ।

श्री नञ्जराजो नवभोजराजो
नृसिंह ——————————लिदासः ।
परस्परान्तस्थितभावरीति
विज्ञायते येन परस्पराभ्याम् ॥ इति

सूत्र ॥ तत्कविसमक्षमेव कृतिना कृतिनायकेन कलुलेकुलचिरन्तकेन स्वकपोलकल्पितसङ्गीतगङ्गाधराद्यनेकप्रबन्धाभिनयदर्शनजनितकौतुकेन कर्णाटभाषाविरचितहालास्यचरितशिवभक्तिविलासादिब(हुप्रबन्)धसमुदयेन सकलविद्वज्जनभागधेयेन नूतनभोजराजेन नञ्जराजेन सबहुमानमाहूतस्समादिष्टोऽस्मीति ।

सरसकवीनां पुरतो ——————— ।
——————————————————॥
—————— स्यास्य सनगरकुलेन्दोः ।
नरसिंहाभिधविदुषः कृतिरियमभिनीय दर्शनीयेति ॥

अहो प्रभुरपि प्रबन्धनिर्मातेत्यदृष्टचरं सङ्गतं श्रीसरस्वत्योः ।

सूत्र ॥ —————————————————— खल्वियं प्रश्नोत्तरोक्तिः ।

विरुद्धयोः श्रीभारत्योरेकत्र-घटनं कुतः ।
वैदग्ध्यात्तत्तु तस्यैव कलुलेनञ्जभूपतेः ॥

End:

इदानीमार्द्राक्षतारोपणमाङ्गलिकनीराजनादिमहोत्सवानुभवाय कन्यया भवन्तं द्रष्टुमुत्कण्ठिता स्मः ॥

कन्या ॥ अयि मन्दमते ॥ रा ॥ रे रम ॥ इति निष्क्रान्तास्सर्वे ॥

इति पञ्चमोऽङ्कः ॥

17. रसिकजनरसोल्लासभाणः.

Beginning :

श्रीमत्पद्माक्षवक्षस्थलनिलयपयःसिन्धुकन्याननाब्जात्
जन्योच्छ्वासच्छटाश्वत्पवनपरिमलैः शेषशैलाधिपस्य ।
नाम्दम्भोजाहतोद्यन्मधुरमधुकरीडिम्भशङ्कां वहन्ती
कान्तिः श्रुत्यन्तरान्तश्रुतिकिसलयितश्रीपदः श्रेयसे स्तात् ॥१॥

वक्षस्थलस्थितविनिस्सृतकौस्तुभश्री
व्याजेन नव्यकमलामृतदिव्यकेल्याम् ।
संसक्तकुङ्कुमविशङ्कटपङ्कसङ्गं
व्यक्तीकरोति स युवा कुशलं दधातु ॥ २ ॥

नान्द्यन्ते सूत्रधारः ॥ समन्ततोऽवलोक्य सान्तर्हासम् ॥
अस्ति खल्वयं निरन्तरशिरोनितान्त . . . .

* * * *

सायं सम्फुल्लमल्लीकुसुमसमुदयस्यन्दिमानन्दरङ्गत्
भृङ्गीसङ्गीतभङ्गीप्रतिवदनकलाचारुवाचाविचारः ।
नात्रं (?) तन्त्रस्वतन्त्रः सकलकविघटाकुण्ठकण्ठीरवश्रीः
श्रीमान् कौण्डिन्यवंशे महति विजयतेऽहोबिलाचार्यवर्यः ॥

कौण्डिन्यवंशकलशोदधिशीतभानुः
शास्त्राम्बुधिग्रसनकुम्भभवप्रभावः ।
विद्वच्छटामकुटरत्नविचित्रिताङ्घ्रिः
आचार्यदीक्षितगुरुस्तनुजः स यस्य ॥

भ्राम्यन्मन्धानभूमीधरशिखरशिलाव्रातसङ्घातजात
शैलोद्यत्तुङ्गरङ्गावलिमिलितपयःपूरसारात्युदाराम् ।

आसीदासेतुशीताचलचरदचलामर्त्यजेगीयमानां
कीर्तिं संप्राप्तवान्यो जयति तदनुजस्सम्पदाचार्यवर्यः ॥
तस्यात्मजो विजयते कमलासनस्य पादारविन्दभजनाञ्चितमानसाब्जः ।
वेदान्तयुग्मपरिशीलनरम्यचित्तः श्रुत्यन्तदेशिकगुरुर्धरणीतलेऽस्मिन् ॥
तत्सूनुः श्रीनिवासाध्वरिगुरुकरुणालब्धमन्त्रोपदेशात्
प्रादुर्भूतप्रबोधरितरुमलकुलजश्रीनिवासार्यवर्यात् ।
राजत्साहित्यमार्गप्रचितसुकविताचातुरीस्फीतरीतिः
सोऽयं भाणं व्यतानीद्रसिकजनरसोल्लासनामाभिरामम् ॥

* * * *

End :

द्राक्षाफलक्षरितपुष्परसानुसारि
वाचाविचारललितो ललितं मनोज्ञम् ।
शृङ्गारवीरकरुणादिरसानुकीर्णं
गृह्णन्तु पण्डितजनाः प्रमदेन भाणम् ॥

(इति निष्कान्तास्सर्वे) ॥

श्रीमत्कामसमुद्रवंशजलधेराजानतो जानता
पारं स्फारमपारभावसरसं सारस्वतं जाग्रतम् ॥
भाणे वेङ्कटनायकेन रचिते पद्मापतेरङ्किते
नाम्नायं परिदृश्यतां यदि वसेद्दोषस्तदाप्युत्तमैः ॥

Colophon :—इति श्रीसकलकविनिकरमणिमयमकुटतटीघटित-चटुलमणिपटलरुचिररुचिनिचयचकचकितचरणारविन्दाण्णयाचार्यानुज-श्रीनिवासाचार्यकरुणापरिणाहकटाक्षवीक्षणक्षणसमासादितसकलानवद्य-हृद्यविद्यापद्याविद्योतमानमानसेन सन्ध्यानटविकटजटाच्छटाकुटीरतटी-नटीभवदभङ्गगङ्गासमुत्तुङ्गतरङ्गसङ्घवद्दरीदृध्यमानमानानूनधारालवाग्धारा-

सारपरिपूरितकविताविनिताघनताजनितामोदविद्वज्जनजेगीयमानकीर्तिपरम्परेण कौण्डिन्यवंशकलशजलनिधिकुमुदबन्धूयमानवेदान्तदेशिकसूनुना श्रीमदक्कमांबागर्भशुक्तिमुक्ताफलेन निरन्तरसरसीरुहनयनचरणसरसीरुहपरिचरणपरिणतमानसवृत्तिना बालकेन वेङ्कटनामकेन विरचितो रसिकजनरसोल्लासभाणः समाप्तः ॥

मन्दोऽपियत्पदसरोरुहवन्दनेन विन्देद्बृहस्पतिसमत्वमवाप्तशास्त्रः ।
तेषां कटाक्षभरतः सततं गुरूणां भाणः समुल्लसतु चित्रचरित्रयुक्तः ॥

उन्मीलन्मुखबिम्बडम्बरपरिभ्राजत्सितांशुस्मित-
स्निग्धज्योत्स्निकया सरोजनिलयानेत्रोत्सवं हासयन् ।
तुङ्गत्वङ्गदपाङ्गभृङ्गनिवहं सामोदमामोदयन्
यः कामी समजीजयत्स कुरुताच्छ्रेयांसि भूयांसि नः ॥

---

18. धनंजयविजयव्यायोगः.

Beginning:

हरेर्लीलावराहस्य दंष्ट्रादण्डस्स पातु वः ।
हेमाद्रिकलशा यत्र धात्री छत्रश्रियं दधौ ॥

अपिच ॥

तद्वः प्रमार्ष्टु विपदः प्रणतार्तिहन्त्र्याः
न्यस्तं पदं महिषमूर्द्धनि चण्डिकायाः ।
वैरी यदीयनखरांशुपरीतशृङ्गः
शक्रायुधाङ्कितनवाम्बुधरप्रभोऽभूत् ॥

तद्वस्सारस्वतं चक्षुस्समुन्मीलतु सर्वदा ।
यत्र सिद्धाञ्जनायन्ते गुरुपादाब्जरेणवः ॥

नान्द्यन्ते सूत्रधारः ॥ समन्तादवलोक्य ॥ अहो रमणीयता प्रभातस्य ॥ तथा हि ॥

दाराणां मुरवैरिणो रतिपतेर्मातुस्त्रिलोकीजितः
स्फारत्पङ्कजकोटरोदरजुषो निद्राविरामे श्रियः ।
प्रत्युद्बुद्धमराळपक्षपटहध्वानप्रबन्धानुगं
भृङ्गीमङ्गलपाटिकेव सततं प्रोत्कूजति प्राङ्गणे ॥

पुनः परितोऽवलोक्य ॥ अहो रमणीयः शरदारम्भः ॥

सरो हरति मे चेतः प्रोन्मज्जत्पद्मकुट्मळं ।
वक्षो हरिणशाबाक्ष्या मन्दोदञ्चत्कुचं यथा ॥

अपि च ॥

निष्पङ्का पृथिवी सशाद्वलतला निर्दुर्दिनञ्चाम्बरं
सुव्यक्तामलतारकेन्दुसचिवाः काशप्रसूनाङ्किताः ।
तोयं वीतविषं सरांसि विकसत्पद्मानि शुभ्रा दिशो
द्रष्टुं सम्प्रति शारदीं श्रियमिमां मन्ये प्रबुद्धो हरिः ॥

नेपथ्याभिमुखमवलोक्य ॥ क एष लिखितहस्तस्समायाति ॥ प्रविश्य पुरुषः ॥ लेहोजेः वकगहदि ॥

सूत्र ॥ विमृश्य वाचयति ॥ अस्ति समस्तप्रशस्तिसाहितः श्रीमज्जयदेवः ॥

अर्थिप्रत्यर्थिलक्षैरप्यपराङ्मुखचेतसं ।
यं पराङ्मुखतां निन्युः केवलं परयोषितः ॥

यस्य चेतसि निर्व्याजं द्वयं तूलकणायते ।
क्रोधे विरोधिनां सैन्यं प्रसादे कनकोच्चयः ॥

स च राजा रङ्गमङ्गळन्नाम नाटकं समादिशति ॥

इह शरदि विराजद्वारिजोत्तंसितायां
प्रथमविगतनिद्रः श्रीस्तनाश्लिष्टवक्षाः ।
शिथिलयति मुरारिर्योगनिद्रानुरागं
तदयमखिललोकस्योत्सवः किं पुनर्नः ॥

तदिदानीं भवता वीररसोद्भूतं रूपकमभिनीय गदाधरमिश्रमुखा अस्मत्पारिषदा आनन्दनीयाः ॥

सूत्र ॥ सविमर्शम् ॥ सचिन्तं च ॥ किं नाम तादृशं रूपकं ॥ स्मृत्वा ॥

कुलं कविमुनेरस्ति पुत्रान् यत्र सरस्वती ।
संशिक्षयति धात्रीव नितान्तमधुरा गिरः ॥

तत्राभवदुपाध्यायो नारायणसमाह्वयः ।
जितवादिसहस्त्रौघः प्राप वागीश्वराभिधां ॥

अपिच ॥

कृतसन्यसनात् प्रयच्छतोऽप्यभयं भूतगणाय योगिनः ।
निजमण्डलभेदशङ्किनो भयभेकस्य रवेरभूद्यतः ॥

उक्तम् ॥ तत्सूनुः काञ्चनो नाम समस्तगुणवल्लभः ।
गोष्ठीशालेव विद्यानां यस्य जिह्वा विराजते ॥

तेनकृतोऽयं धनञ्जयविजयव्यायोगोऽभिनेतव्यः ॥

सूत्र ॥ नेपथ्याभिमुखमवलोक्य ।

End:

सारस्वतं स्फुरतु चेतसि सत्कवीनां चक्षुर्भवन्तु कृतिनो गतमत्सराश्च ।
सानुरागसत्यज्यतानयप्रता . . . . श्चातुराणां ॥

इति निष्क्रान्तास्सर्वे । इति काञ्चनकविविरचितो धनञ्जयविजयो नाम व्यायोगस्संपूर्णः ॥

जगन्नाथेन लिखितः ॥

19. नारायणीविलासः

Beginning:

ओंकारात्मकमभ्युपैति परमं यत्सच्चिदानन्दताम्
कारुण्यादमृताय यत्सुमनसां सारस्वतः कल्पते ।
स्वैरं दीव्यति दुर्हृदो दमयितुं सम्मोहयन्मायया
तद्वच्छ्रीधरणीसमेतमवतान्नारायणाख्यं महः ॥

नान्द्यन्ते सूत्रधारः ॥ नेपथ्यं प्रति ॥ आर्ये । आगम्यताम् ।
प्रविश्य । नटी ॥ अंअ एसांहि ॥
सूत्रधारः ॥

पुत्रो बुक्कनरेन्द्रस्य दौहित्रो रामभूपतेः ।
विद्यते हि विरूपाक्षो राजा हरिहरात्मजः ॥

नटी ॥ पसिद्धोखु(भवअ) सो भअरविज्जाए ।
(प्रसिद्धः खलु सः भरतविद्यायाम्) ॥

सूत्र ॥

तस्य राज्ञः कर्णाटतुण्डीरचोलपाण्डयमण्डलाधिपतेर्सिंहलद्वीप-जयस्तम्भस्य षोडशमहादानदीक्षितस्य सकलकलाविलासिनीस्वयंवरपतेः कृतिषु नारायणीविलासं नाम नाटकं प्रयोक्ष्ये ॥

* * * *

End:

ब्रह्मादयः ॥ अतः परमपि किमन्यदस्ति ॥
प्रत्यापन्नपदानामायुष्यं दत्तममृतमस्माकम् ।
त्रिभुवनहिताय नीताः प्रतिहतिमसुराश्च यद्विभो भवता ॥
तथाप्येवमस्तु भरतवाक्यम् ॥

एष वीरो विरूपाक्षश्शेषसारेण बाहुना ।
एकच्छत्रीकरोत्येनां भूतधात्रीं नयोन्नतः ॥

इति निष्क्रान्तास्सर्वे । पञ्चमोङ्कः ॥

20. भल्लटशतकम्.

Beginning:

तां भवानीं भवानीतक्लेशनाशविशारदाम् ।
शारदां शारदाम्भोदसितसिंहासनां नुमः ॥ १ ॥

युष्माकमम्बरमणेः प्रथमे मयूखाः
ते मङ्गलं विदधतूदयरागभाजः ।
कुर्वन्ति ये दिवसजन्ममहोत्सवेषु
सिन्दूरपाटलमुखीरिव दिक्पुरन्ध्रीः ॥ २ ॥

End:

सर्वप्रजाहितकृतः पुरुषोत्तमस्य
वासे समस्तविबुधप्रहितेष्टसिद्धौ ।
चन्द्रांशुविस्मृतिकरच्युतिमत्यमुष्मिन्
हे कालकूट तव . . . . . . ॥ १२० ॥

अयं वारामेको निलय इति रत्नाकर इति
श्रितोऽस्माभिस्तृष्णातरलितमनोभिर्जलनिधिः ।
क एवं जानीते निजकरपुटीकोटरगतं
क्षणादेनं ताम्यत्तिमिमकरमापास्यति मुनिः ॥ १०९ ॥

---

21. रसार्णवसुधाकरः.

Beginning:

शृङ्गारवीरसौहार्दमौग्ध्यवैयात्यसौरभम् ।
लास्यताण्डवसौजन्यं दाम्पत्यं तद्भजामहे ॥

वीणाङ्कितकरां वन्दे वाणीमेणीदृशं सदा ।
सदानन्दमयीं देवीं सरोजासनवल्लभाम् ॥

अस्ति किञ्चित् परं वस्तु परमानन्दकन्दलम् ।
कमलाकुचकाठिन्यकुतूहलिभुजान्तरम् ॥

तस्य पादाम्बुजाज्जातो वर्णो विगतकल्मषः ।
यस्य सोदरतां प्राप्तं भगीरथतपःफलम् ॥

तत्र रेचल्लवंशाब्धिशरद्राकासुधाकरः ।
कलानिधिरुदारश्रीरासीद्याचमनामकः ॥

यस्यासिधारामार्गेण दुर्गेणापि रणाङ्गणे ।
पाण्ड्यराजगजानीकाज्जयलक्ष्मीरुपागता ॥

खङ्गनारायणे यस्मिन् भवति श्रीरतिस्थिरा ।
भूरभून् करिणीवश्या दृ(दु)ष्टराजगजाङ्कुशे ॥

तस्य भार्या महाभाग्या विष्णोः श्रीरिव विश्रुता ।
पोचमाता गुणोदारा जाता तामरसान्वयात् ॥

तयोरभूवन् क्षितिकल्पवृक्षाः पुत्रास्त्रयस्त्रासितवैरिवीराः ।
श्रृङ्गप्रभूपोऽन्नमनायकश्च वीराग्रणी रेचमहीपतिश्च ॥

कलावेकपदो धर्मो यैरेभिश्चरणैरिव ।
संपूर्णपदतां प्राप्य नाकांक्षति कृतं युगम् ॥

तत्र श्रृङ्गमहीपाले पालयत्यखिलां महीम् ।
नमतामुन्नतिश्चित्रं राज्ञामनमतां नतिः ॥

कृष्णैलेश्वरसन्निधौ कृतमहासम्भारमेलेश्वरे
वीतापायमनेकशो विदधता ब्रह्मप्रतिष्ठापनम् ।
आनृण्यं समपादि येन विभुना तत्तद्गुणैरात्मनो
निर्माणातिशयप्रयासगरिमव्यासाङ्गिनि ब्रह्मणि ॥

कृतान्तजिह्वां कुटिलां कृपाणीं दृष्ट्वा यदीयां त्रसतामरीणाम् ।
स्वेदोदयाश्चेतसि सञ्चितानां मानोष्मणामाननुते प्रशान्तिम् ॥

श्रीमानूरेचमहीपतिस्सुचरितो यस्यानुजन्मा स्फुटम्
प्राप्तो वीरगुरुप्रथां पृथुतरां वीरस्य मुद्राकरः ।
लब्ध्वा लब्धकठारिरायबिरुदं राहूत्तरायाङ्कितम्
पुत्रं नागयनायकं वसुमतीवीरैकचूडामणिम् ॥

सोऽयं सिङ्गमहीपालो वसुदेव इति स्फुटम् ।
अनन्तमाधवौ यस्य तनुजौ लोकरक्षकौ ॥

तत्रानुजो माधवनायकेन्द्रो दिगन्तरालप्रथितप्रभावः ।
यस्याभवन्वंशकरा नरेन्द्रास्तनूभवा देवगिरीन्द्रमुख्याः ॥

तस्याग्रजन्मा भुवि राजदोषैरपेतभावादनप(पो)तसंज्ञाम् ।
ख्यातां दधाति स्म यथार्थभूतामनन्तसंज्ञां च महीधरत्वात् ॥

सोदर्यो बलभद्रमूर्तिरनिशं देवी प्रिया रुक्मिणी
प्रद्युम्नस्तनयोऽपि पौत्रनिवहो यस्यानिरुद्धादयः ।
सोयं श्रीपतिरन्नपोतनृपतिः किंत्वाननाम्भोरुहे
धत्ते चारुसुदर्शनश्रियमसौ स त्वात्महस्ताम्बुजे ॥

बहुसोमसुतं कृत्वा भूलोकं परिरक्षति ।
एकसोमसुतं रक्षन् स्वर्लोकं लज्जते हरिः ॥

सोमकुलपरशुरामे भुजबलभीमेऽरिमापि(थिभूमि)गोपाले ।
यत्र च जाग्रति शासति जगतां जागर्ति नित्यकल्याणम् ॥

हेमाद्रिदानैर्धरणीसुराणां हेमाचलं हस्तगतं विधाय ।
यश्चारुसोपानपथेन चक्रे श्रीपर्वतं सर्वजनाङ्घ्रिगम्यम् ॥

योऽनेकवीरोद्धरणेऽप्यसंख्यसंख्योऽप्यभग्नात्मगतिक्रमोऽपि ।
अजातिसाङ्कर्यभवोऽपि चित्रं दधाति सोमान्वयभार्गवांशम् ॥

धावं धावं रिपुनृपतयो युद्धरङ्गानुविद्धाः
खड्गे खड्गे फलितवपुषं यं पुरस्ताद्विलोक्य ।

प्रत्यावृत्या वितत इतो (वितथगतयो) वीक्षमाणा यदीयं
संमन्यन्ते स्फुटमवितथं ख(ड्ग)नारायणांशम् ॥

अन्नमाम्बेति विख्याता तस्यासीद्धरणीपतेः ।
देवी शिवा शिवस्येव राजमौलेर्महोज्वला ॥

शत्रुघ्नं शत्रु(श्रुत)कीर्तिर्या सुभद्रा यशसार्जुनम् ।
आनन्दयति भर्तारं श्यामा राजानमुज्वलम् ॥

तयोरभूतां पुत्रौ द्वौ आद्यो वेदगिरीश्वरः ।
द्वितीयस्तद्वितीयोऽसौ यशसा शिवभूपतिः ॥

अथ श्रीशृं(शि)ङ्गभूपालो दीर्घायुर्वसुधामिमाम् ।
निजांसपीठे निर्व्याजं कुरुते सुप्रतिष्ठिताम् ॥

अहीनज्याबन्धं कनकरुचिरं कार्मुकवरम्
बलिध्वंसी बाणः परपुरमनेकं च विषयः ।
इति प्रायो लोकोक(त्त)रसमरसन्नाहविधिना
महीशोऽयं शृं(शि)ङ्गक्षितिप इति यं जल्पति जनः ॥

यत्र च रणसंनाहिनि तृणचरणं निजपुराच्च निस्सरणम् ।
वनचरणं तच्चरणकपरिचरणं वा विरोधिनां शरणम् ॥

सतां प्रीतिं कुर्वन् कुवलयविकासं विरचयन्
कलाः कान्ताः पुष्णन् दधदपि च जैवातृककथाम् ।
नितान्तं यो राजा प्रकटयति मित्रोदयमहो
तथा चक्रानन्दानपि च कमलोल्लाससुमु(षु)षा(मा)म् ॥

तल्लब्धानि घनाघनै(स्ततइतो वारां पृषन्त्यम्बु)धौ
स्वात्यामेव हि शुक्तिकासु दधते मुक्तानि मुक्तात्मताम् ।
यद्दानोदकविप्रुषस्तु सुधियां हस्ते पतन्त्योऽभवन्
माणिक्यानि महाम्बराणि बहुशो दामानि हेमानि च ॥

नयमनयं गुणमगुणं पदमपदं निजमवेत्य रिपुभूपाः ।
यस्य च नयगुणविदुषोऽपि नमन्ति पदारविन्दपीठान्तम् ॥

प्राणानां परिरक्षणाय बहुशो वृत्तिं मदीयां गताः
त्वत्सामन्तमहीभुजः करुणया ते रक्षणीया इति ।
कर्णे वर्णयितुं नितान्तसुहृदोः कर्णान्तविश्रान्तयोः
मन्ये यस्य दृगन्तयोः परिसरं सा कामधेनुः श्रिता ॥

युष्माभिः प्रतिगण्डभैरवरणे प्राणाः कथं रक्षिताः
इत्यन्तःपुरपृच्छया यदरिषु प्राप्तेषु लज्जावशम् ।
शंसत्युत्तरमाननव्यतिकरव्यापारपारं गताः
गण्डान्दोलितकर्णकुण्डलहरिन्माणिक्यकर्णाङ्कुराः ॥

मन्दारपारिजातकसन्ता(नक)कल्पसुरमणीसदृशैः ।
अनपोततदा(अनपोतदा)चवल्लभवेदगिरिस्वामि मांदधांनयसंज्ञैः

(माददामयाभिख्यैः) ॥

आत्मभवैरतिविभवैरनितरजनसुलभदानरुदितै(?)र्भुवि यः ।
रत्नाकर इव राजति राजकरारूढरचितकमलोल्लासः ॥

यस्याद्यः प्रथमः कुमारतिलकः श्रीयन्नपोतो गुणै
रेकस्यात्मजमात्मरूपविभवे चापे द्वयोरग्रजम् ।
आरूढे त्रितयाग्रजं विजयते दुर्वारदोर्विक्रमं
सत्योक्तौ चतुरग्रजं वितरणे किञ्चापि पञ्चाग्रजम् ॥

यत्पुत्रस्य कुमारदाचयविभोः खड्गाग्रधाराजले
मज्जन्ति प्रतिपक्षभूमिपतयश्शौर्योष्णसन्तापिताः ।
चित्रं तत्प्रमदाः प्रणष्टतिलका व्याकीर्णनीलालकाः
प्रभ्रश्यत्कुचकुङ्कुमाः परिगलन्नेत्रान्तकालाञ्जनाः ॥

परिपोषिणि यस्य पुत्ररत्ने दयिते वल्लभरायपूर्णचन्द्रे ।
समुदेति सतां प्रभाविशेषः कमलानामभिवर्धनं तु चित्रम् ॥

पुत्रैरन्यैश्च तनयः सोऽयं शिङ्गमहीपतिः ।
षड्भिः प्रतिष्ठामयते स्वमिवाङ्गैस्सुसङ्गतैः ॥

राजा स राजाचलनामधेयामध्याह्न(स्त) वंशक्रमराजधानीम् ।
सतां च रक्षामसतां च शिक्षा(क्षां) न्यायानुरोधादनुसन्दधानः ॥

विन्ध्यश्रीशैलमध्यक्ष्मामण्डलं पालयन् सुतैः ।
वंशप्रवर्तकैरर्थान् भुङ्क्ते भोगपुरन्दरः ॥

यस्मिन् शासति शिङ्गभूमिरमणे क्ष्मामन्नपोतात्मजे
काठिन्यं कुचमण्डले चपलता नेत्राञ्चले सुभ्रुवां ।
वैषम्यं त्रिवलीषु मन्दपदता लीलालसायां गतौ
कौटिल्यं चिकुरेषु किंच कृशता मध्ये परं बध्यते ॥

सोऽहं कल्या(ण)रूपस्य वर्णोत्कर्षैककारणम् ।
विद्वत्प्रसादनाहेतोः वक्ष्ये नाट्यस्य लक्षणम् ॥

पुरा पुरन्दराद्यास्ते प्रणम्य चतुराननम् ।
कृताञ्जलिपुटा भूत्वा पप्रच्छुस्सर्ववेदिनम् ॥

भगवन् श्रोतुमिच्छामः श्राव्यं दृश्यमनोहरम् ।
धर्म्यं यशस्यम(र्थ्य)ञ्च सर्वशिल्पप्रदर्शनम् ॥

परं पञ्चममाम्नायं सर्ववर्णाधिकारिकम् ।
इति पृष्टस्स तैर्ब्रह्मा सर्ववेदाननुस्मरन् ॥

तेभ्यश्च सारमादाय नाट्यवेदमथासृजत् ।
अध्याप्य भरताचार्यं प्रजापतिरभाषत ॥

सह पुत्रैरिमं वेदं प्रयोगेण प्रकाशय ।

इति तेन नियुक्तस्तु भरतस्सह सूनुभिः ॥
प्रायोजयत्तुधर्मायामिन्द्रस्याग्रेऽप्सरोगणैः ।
सर्वलोकोपकाराय नाट्यशास्त्रं च निर्ममे ॥

तथा तदनुसारेण शाण्डिल्यः कोहलोऽपि च ।
दन्ति(त्ति)लश्च मतङ्गश्च ये चान्ये तत्तनूभवाः ॥

ग्रन्थान्नानाविधांश्चक्रुः प्रख्यातास्ते महीतले ।
तेषामतिगभीरत्वात् विप्रकीर्णक्रमत्वतः ॥

संप्रदायस्य विच्छेदात्तद्विद्वाद्विर(ल)त्वतः ।
प्रायो विरलसंचारा नाट्यपद्धतिरस्फुटम् ॥

तस्मादस्मत्प्रयत्नोऽयं तत्प्रकाशनलक्षणः ।
सारेण ग्राहिणा चित्तमानन्दयति धा(धी)मताम् ॥

नेदानींतनदीपिका किमु तमस्सङ्घातमुन्मूलयेत्
ज्योत्स्ना किञ्च चकोरपारणकृते तत्कालसंशोभिनी ।
बालः किं कमलाकरान् दिनमणिर्नोल्लासयेदञ्जसा
तत्सम्प्रत्यपि मादृशामपि वचः स्यादेव सत्प्रीतये ॥

स्वच्छस्वादुरसाधारो वस्तुच्छायामनोहरः ।
सेव्यस्सुवर्णनिधिवन्नाट्यमार्गस्य नायकः ॥

*   *   *   *

End:

मत्वा या(धा)त्रा तुलायां लघुरिति धरणीं शिङ्गभूपालचन्द्रे
सृष्टो (ष्टे) तत्रातिगुर्व्यां तदुपनिधितया स्थाप्यमानैः क्रमेण ।
चिन्तारत्नौघकल्पद्रुमततिसुरभीमण्डलैः पूरितान्ता
मूर्ध्वं नित   म्ना तरिकुलशतैः (नीतां विलोक्य ध्रुवमुडुनिकरैः)
पूर्यतेऽद्यापि सा द्यौः ॥

Colophon :— इति श्रीमण्डलाधीश्वरश्रीअनपोतनरेन्द्रनन्दनबलभुजबलभीमश्रीशिङ्गभूपालविरचिते रसार्णवसुधाकरनाम्नि नाट्यालंकारशास्त्रे भावकोल्लासो नाम तृतीयोल्लासः ॥

श्रीतोयशैलवसतिस्स तमालनीलो
जीयाध्व(द्ध)रिर्मुनिचकोरसुशारदेन्दुः ।
लक्ष्मीस्तनस्तबककुङ्कुमकर्दमश्री
संलिप्तनिर्मलविशालभुजान्तरालः ॥

मलयगिरिनिवासी मारुतो यच्छताङ्गः
तरुणशिशिररश्मे(श्मि)र्यत्सुहृत् पुण्यकीर्तिः ।
चरति चिरमनङ्गः क्वापि कैरप्यदृश्यः
स जयतु रसिकौघैर्वन्दितः पञ्चबाणः ॥

अशेषाणां द्विजनुषामाशीर्वादपरम्परा ।
तरङ्गयतु कल्याणं कविना(वीनां) चायुरायतम् ॥

एतद्ग्रन्थसङ्ख्या (3,315) ॥

---

22. अलङ्कारेन्दुशेखरः.

Beginning:

कल्याणं कल्याणाचलधर्मधरो धरात्मजामानम् ।
विरचयतु राजमौलिः परमहिमक्ष्माभृदीशिलाल्याङ्घ्रिः ॥

दानवारिधरश्चक्षुःश्रवणोदारभूषणः ।
विनतानन्दनो देयात् कुशलानि विनायकः ॥

शान्ताविलासाख्यकृतेर्मुख्यां व्याख्यां विधाय यः ।
हरिशाबकरीन्द्रस्य प्रेमपात्रं बभूव यः ॥

तेन श्रीशैलवंश्येन नृसिंहार्येण निर्मितः ।
आर्यानन्दकरो भूयादलंकारेन्दुशेखरः ॥

इह खलु कविः ॥

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥

निर्दोषं गुणवत् काव्यमलंकारैरलंकृतम् ।
रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिं च विन्दति ॥

इत्यादिना काव्यस्यानेकश्रेयस्साधनतां काव्यालापांश्च वर्जयेदिति निषेधस्य काव्यसामान्यनिषेधपरत्वेन रामायणादेरपि हेयताप्रसङ्गसंभवेन तादृशनिषेधस्यासत्काव्यमात्रविषयतां ॥

* * * *

अलङ्कारशास्त्रस्य काव्यस्वरूपज्ञानसाधनतां चानुसन्दधानः बालानां सुखबोधनानुकूलं लक्षणमालिकाख्यं अलङ्कारशास्त्रं चिकीर्षन्नादौ मङ्गलमाचरति ॥ वन्दे इत्यादि ॥

वन्दे वन्दारुसन्दोहमन्दिरालिन्दकल्पकम् ।
अब्जारिकलितं देवं श्रीशैलशिखरेश्वरम् ॥

वन्दारूणां भक्तानां वन्दारुरभिवादुक इत्यमरः

End :

भ(भा)वप्रधानमाख्यातमिति वदतां वैयाकरणानां मते "लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभ " इत्यत्र तमःकर्तृकं अङ्गकर्मकं लेपनं नभःकर्तृकं अञ्जनकर्मकं वर्षणकमिति च बोधः । प्रथमान्तार्थमुख्यविशेष्यको बोध इति वदतां नैयायिकानां मते तु अङ्गकर्मकलेपनकर्तृकतमःकर्मकवर्षणकर्तृ नभ इति च बोधः ॥

23. शारीरकभाष्यव्याख्या (भाष्यरत्नप्रभा).

Beginning :

यं हि वैराग्यसंपन्नास्तत्वमर्थविवेकिनः ।
लभन्ते साधनैर्दान्तास्तं सीतानायकं भजे ॥

तदन्तरप्रतिपत्तौ . . . भ्याम् * ॥ वृत्तमनूद्य तृतीयाध्यायार्थमाह द्वितीय इत्यादिना अविरुद्धे वेदान्तार्थे तत्ज्ञानसाधनचिन्तावसर इत्यनयोर्हेतुहेतुमद्भावः लिङ्गोपाधिसिद्धौ तदुपाहितजीवसंसारचिन्तेति पादयोरपि तद्भावः । तत्सङ्गतिः अत्र प्रथमपादे वैराग्यद्वितीये स्वप्नाद्यवस्थोक्त्या त्वंपा(प)दार्थो ब्रह्मतत्वं चोच्यते । तृतीये वाक्यार्थस्तदर्थमुपासनाश्च विचार्यन्ते ॥

चतुर्थपादार्थमाह । सम्यग्दर्शनादिति॥ दर्शनोपायास्सन्यासादयः॥

* * * *

Colophon of the third Adhyāya :— इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविन्दानन्दभगवत्कृतायां शारीरकव्याख्यायां भाष्यरत्नप्रभायां तृतीयाध्यायस्य चतुर्थः पादः । तृतीयाध्यायः समाप्तः ॥

End :

अनावृत्तिश्शब्दादिति एवं समयोक्त्या ब्रह्मात्मैक्यस्य वेदान्तप्रमाणकत्वमवधारितम् वाक्यार्थज्ञाने स्मृतितर्कादिसर्वप्रकारविरोधः सुपरिहृतः साधनसंपत्तिश्च दर्शिता । तस्माद्विवेकादिसाधनसंपन्नस्य श्रवणाद्यावृत्तिनिरस्तप(प्र)तिबन्धस्याखण्डात्मबोधात्समूलबन्धध्वंसे सत्याविर्भूतनिष्कलङ्कानन्तस्वप्रकाशचिदानन्दात्मनावस्थानमिति सिद्धम् ॥

---

* तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम् ॥

नानाविधग्रन्थजातं वीक्ष्य सम्यग्यथामति ।
शारीरकस्य भाष्यस्य कृता व्याख्या सतां मुदे ॥
अन्तर्यामी जगत्साक्षी सर्वकर्ता रघूद्वहः ।

* * * *

---

24. सूत्रोपन्यासः.

Beginning:

बोधानन्दगणाध्यक्षं कालमूषिकवाहनम् ।
जन्मादिविघ्नहर्तारं भजे निजगुरुं सदा ॥
विद्याशङ्करपादाब्जपरागाः पान्तु पावनाः ।
निस्तमस्कसदानन्दसाक्षात्करणहेतवः ॥
नमामि शुद्धविज्ञानमात्मभारतिसद्गुरुम् !
यस्यावलोकनान्मूको वावदूकत्वमाप्नुयात् ॥
आचार्यभाष्याकात(?)न्निबन्धनसागरात् ।
तदर्थरत्नान्युद्धृत्य सूत्रेषु ग्रन्थयाम्यहम् ॥

ओं अथातो ब्रह्मजिज्ञासा ।

इह खलु सूत्रे सर्वज्ञबादरायणप्रणीतत्वादानर्थ (क्या)नुपपत्तेः निरर्थकसिद्धबोधकत्वानुपपत्तेश्च विस्रे(?)पुरुषं प्रत्युपयोगि तथा कर्तव्येति पदमध्याहर्तव्यम ॥

* * * *

End:

वैयासिकानां सूत्राणामुपन्यासः कृतो मया ।
अलसानां नृणामीषत् प्रतीतिर्जायतामिति ॥

टीका स्नेहविहीनापि व्याससूत्रार्थदीपिका ।
इयं रामेशभारत्याः कृतिर्विजयतां भुवि ॥

Colophon :— इति श्रीपरमहंसपरिव्राजकश्रीरामेश्वरभारतीविरचितो वैयासिकसूत्रोपन्यासः परिसमाप्तः ॥

श्रीमज्ज्ञानेन्द्रगुरूणां पदपङ्कजषट्पदः ।
गोविन्देन्द्रयतिः प्रीत्यै व्यलिखत् विदुषां मुदा(दे) ॥

---

25. ज्ञानवासिष्ठसप्तशती.

Beginning :

दिवि भूमौ तथाकाशे बहिरन्तश्च मे विभुः ।
यो विभात्यवभासात्मा तस्मै सर्वात्मने नमः ॥

अहं बद्धो विमुक्तस्स्यामिति यस्यास्ति निश्चयः ।
नात्यन्ततद्ज्ञो(मज्ञो) नेतज्ज्ञो ह्यस्मिन् शास्त्रेऽधिकारवान् ॥

गुरुमासीनमेकान्ते वाल्मीकिं सर्वदर्शिनम् ।
पप्रच्छ प्रणतो भूत्वा भरद्वाजो मृदुस्वरम् ॥

* * * *

End :

स्नातं तेन समस्ततीर्थसलिलैः सर्वापि दत्तावनिः
यज्ञं चापि समस्तमिष्टमनघं देवाश्च संपूजिताः ।
संसाराच्च समुद्धृताः स्वपितरः त्रैलोक्यपूज्योऽप्यसौ
यस्य ब्रह्मविचारणे क्षणमिह प्राप्नोति धैर्यं मनः ॥

Colophon :— इति श्रीमद्वाल्मीकीये वासिष्ठरामायणसप्तशत्यां निर्वाणप्रकरणम् ॥

इति श्रीमद्वाल्मीकीये वासिष्ठरामायणे द्वात्रिंशत्सहस्रिकायां संहितायां श्रीमत्कृष्णगिरिपुरीनिवासनृसिंहाख्यद्विजवरेण्यतनयेन श्रीमत्-

शृङ्गेरीश्रीनृसिंहभारतीस्वामिभिः कलियुगजनक इति दत्तनामधेयस्य वेङ्कटरमणयार्यस्यानुजेन कृष्णयाभिधानेनोद्धृतः श्रीमत्काश्मीरपण्डितरचितव्याख्यानसहितसारसमुच्चयसप्तशती सम्पूर्णा ॥

ఇతి శ్రీసీతారామకృపారసస్ఫురితశ్రీహరితసగోత్రపవిత్రితలచనాడు వంశ పయఃపయోధికైరవమిత్రసజ్జనవర్ణనీయచరిత్రనృసింహాఖ్యాభిఖ్యాతభూసురవర్య పుత్రుండును శ్రీమద్వాసిష్ఠరామాయణంబును సప్తశతిగా సంగ్రహించిన కృష్ణయాఖ్యునకు అగ్రజుండును అగు వెంకటరమణయ్యచే రచింపంబడిన శ్రీమద్వ్యాస్తీయంబగు వాసిష్ఠరామాయణసప్తశత్యాంధ్రటీక ముగిసెను.

प्रकरणनामधेयानि.	ग्रन्थसंख्या.
(1) वैराग्यप्रकरणम्	103
(2) मुमुक्षुत्वप्रकरणम्	59
(3) उत्पत्तिप्रकरणम्	99
(4) स्थितिप्रकरणम्	138
(5) उपशमप्रकरणम्	101
(6) निर्वाणप्रकरणम्	200
	700

---

26. भगवन्नामवैभवम्.

मुरलीधरदासकृतम् ॥

Beginning:

श्रीमद्राधाकृष्णचरणौ शरणं प्रपद्ये ॥ श्रीमते राधाकृष्णाय नमः ॥

राधासहायवेण्वंशं श्रीमद्वल्लभनन्दनम् ।
पद्माक्षं विठ्ठलाधीशं वन्दे स्वज्ञानदं गुरुम् ॥

नामोच्चारणमात्रेण यस्तारयति मानवान् ।
रमासर्वस्वविषयं तं वन्दे देवकीसुतम् ॥

यशोदोत्सङ्गशयनं यशोभाग्भिरभिष्टतम् ।
विशालपद्मनयनमाशासे नन्दनन्दनम् ॥

नत्वा श्रीनारदं व्यासं शुकतातं तथा शिवम् ।
सविरिञ्चं हरिं नत्वा वक्ष्ये तन्नामवैभवम् ॥

अथेदं विचार्यते भगवतो लक्ष्मीरमणस्य नामोच्चारणं किं साक्षान्मोक्षजनकं उत विरागज्ञानसहकृतभक्तिद्वारेति साक्षादेवेत्यङ्गीकार्यम् । द्वितीयपक्षे "एतन्निर्विद्यमानानामिच्छतामकुतोभयं । योगिनां नृप निर्णीतं हरेर्नामानुकीर्तनमि ॥" ति श्रीशुकवचनविरोधापत्तेः ॥ . . . .

इति श्रीमुरलीधरदासकृतौ भगवन्नामवैभवे भगवन्नामसङ्कीर्तनस्य स्वतन्त्रत्वेन भगवत्प्राप्तिलक्षणमोक्षसाधनत्वनिरूपणं नाम प्रथमस्तबकः ॥ . . . . .

इति . . . सङ्कीर्तनस्य पुरुषार्थचतुष्टयत्वनिरूपणं नाम द्वितीयस्तबकः ॥ . . . .

इति . . . सङ्कीर्तनस्य स्वतन्त्रतया सर्वपापक्षयकरत्वसर्वधर्मसाद्गुण्यकरत्वनिरूपणं नाम तृतीयस्तबकः ॥

इति . . . सङ्कीर्तनस्य स्वतन्त्रत्वेन कलिदोषनिबर्हणत्वनिरूपणं नाम चतुर्थस्तबकः ॥

कलिदोषहरे दिव्ये कल्याणाद्भुतसुन्दरे ॥
कलयेन्मे रतिं कृष्णः स्वनाम्नि करुणानिधिः ॥
श्रीकृष्णः शरणं मम ॥

* * * *

इति . . . . सङ्कीर्तनलक्षणधर्मस्य निरङ्गत्वनिरूपणं नाम पञ्चमस्तबकः ॥

॥ श्रीकृष्णः शरणं मम ॥ . . . .

End :

कांश्चिन्ममानुध्यानेन नामसङ्कीर्तनादिभिः । योगेश्वरानुवृत्त्या वा हन्यादशुभदान् शुभैः ॥ इति । अपिच । आपन्न स्संसृ(सृ)तिं घोरां यन्नाम विवशो गृणन् । ततः सद्यो विमुच्येत यद्बिभेति स्वयं भयः ॥ इत्यादिभागवतवचनैर्भगवत्प्राप्तिरूपमोक्षस्याव्यवहितपरमसाधनत्वेन निर्णीतं श्रीहरिनामसङ्कीर्तनं मुमुक्षूणां मोक्षोपयोगिसर्वसाधनप्रदमित्येतदुपपन्नतरमिति सर्वं समञ्जसम् ॥

स्वनाम्नि भगवान्दद्याद्रतिं मे रघुनन्दनः ।
अनायासेन मुक्तास्स्युर्येन सर्वे मुमुक्षवः ॥
भगवन्नामविभवं पठन्निममनन्यभाक् ।
भगवन्नाम्नि रतिमान् भूयात् कृष्णप्रसादतः ॥

Colophon :— इति श्रीमुरलीधरदासकृतौ भगवन्नामवैभवे भगवन्नामसङ्कीर्तनस्य सर्वविधवैभवचिन्तनं नाम षष्ठः स्तबकः ॥

श्रीमद्विठ्ठलनाथाय कृष्णवेणुस्वरूपिणे ।
मङ्गलं पुष्टिमार्गैकवर्धकाय प्रियात्मने ॥
जयताम्मुरलीगानरसिको हरिरीश्वरः ।
पीताम्बरः पद्मनेत्रः स्व(स्वा)मिनीरमणः प्रभुः ॥

श्रीयशोदोत्सङ्गलालिताय नमः ॥ श्रीकृष्णः शरणं मम ॥

---

27. परतत्वविलासः.

कृष्णतीर्थरचितः ॥

Beginning:

निर्विकारामलानन्दनित्यसन्मूर्तिमीश्वरम् ।
सर्वेश्वरमजं कृष्णं कारुण्यघनमाश्रये ॥

अथेदं विचार्यते घनश्यामादिलक्षणं भगवद्रूपं किमानन्दमात्रं उत प्रकृतिगुणकृतं वेति आद्ये तु ओमिति ब्रूमः । द्वितीयपक्षे तु बहुप्रमाणविरोधापत्तेः । केचित्तु अवतारकाले नृतनुमूर्तिग्रहणत्यागादिश्रवणात् द्वितीय एव पक्षः साधुरिति मन्यन्ते । ते प्रष्टव्याः किं भगवान् कालपरतन्त्रः आहोस्वित् तदतीतस्वतन्त्रो वा । नाद्यः कालातीतत्वस्य सर्वशास्त्रप्रसिद्धत्वात् । किञ्च गुणातीतस्य कालस्यैव गुणक्षोभकतया गुणपरतन्त्रत्वासम्भवे कथं वा भगवतोऽचिन्त्यानन्दानित्यविग्रहस्वभाववतः कालाधीनगुणकृतदेहवत्वं स्यात् जीवस्य तु स्यात् कालपरतन्त्रतया गुणाधीनदेहवत्वं । तदुक्तं नारदेन "कालकर्मगुणाधीनो देहोऽय" मिति ॥

* * * *

End:

शरण्यं करुणार्णवमित्यादिप्रमाणबोधितां केवलां भगवत्कृपामेव स्वस्य साधनतयावलम्बन्तो (माना) भगवन्तं प्रार्थयन्ते तेषां स्वयमेवाभयं ददाति भगवान् । आह च गीतायां रामायणेऽपि । सकृदेव । मामेव ये । मामेकं शरणं व्रजेति । तत्कृपापात्रभूता एव तन्मनस्कास्तदालापा इत्युक्तरीत्या तदेकान्तभक्ता भवन्तीति सर्वं समञ्जसम् ॥

परतत्वविलासोऽयं परस्य ब्रह्मणो हरेः ।
मुखोल्लासं जनयतु चम्पकारण्यभूपतेः ॥
परतत्वविलासोऽयं परमानन्दनिर्भरैः ।
श्रीकृष्णतीर्थैरचितं (तः) श्रीवल्लभमुदावहम्(हः) ॥

२८. सुवर्णसूत्रं ॥ (विद्वन्मण्डनव्याख्या) ॥

पुरुषोत्तमविरचितम् ॥ अपूर्णम् ॥

Beginning:

नमामि श्रीबालकृष्णं यशोदोत्सङ्गलालितं ।
पूतनासुपयःपानरक्षिताशेषबालकं ॥
नमामि श्रीमदाचार्यचरणान् करुणार्णवान् ।
सुधानिधिरभूदाविर्यतः श्रीविठ्ठलेश्वरः ॥
यद्वक्त्रोदितमुज्वलद्युतिलसन्नानाश्रुतिव्यासवाक्
सम्मिश्रं रसपूरितं विजयते पीयूषमत्यद्भुतं ।
यत्सप्तानृतवादिभिः खलु समं पेपीयमानं मुहुः
पूर्वान्नन्दयतीतरान् कृशयति द्रागेव नैजैर्गुणैः ॥
तत्करुणालवदर्शितसरणिः पुरुषोत्तमस्तनुते ।
विद्वन्मण्डनयुक्तौ सुवर्णसूत्रं सदा प्रणतः ॥

इह हि प्रभुचरणाः स्वीयानां मुख्यभक्तिमार्गतदुपयोगिब्रह्मवादाप्रवादजनितखेदमसहमानास्तन्निरासाय विद्वन्मण्डनं कुर्वन्तः स्वमार्गस्यातिगोप्यत्वं सकलप्रमाणमूर्धन्यश्रुतिसिद्धत्वं च ज्ञापयन्तः तदभिज्ञापकं मङ्गलवाक्यं शिष्यशिक्षायै ग्रन्थारम्भे निबध्नन्ति ॥ निजमुरळिकेति निजाचासौ मुरळिका च निजमुरळिका ॥ . . . . . .

. . . . . .

गुरौ भगवतीव बुद्धिरावश्यकीति श्रीमदाचार्यान्नमस्यन्तो ग्रन्थकरणं प्रतिजानते । पितृचरणानिति । त्वं हि नः पिता योऽस्माकमविद्यायाः पारं तारयसीति प्रश्नश्रुतेः पातीति पितेति योगोऽत्रापि ग्राह्यः । मृतेऽण्ड एष तस्मिन् यदभूत्ततो मार्ताण्ड इति व्यपदेश इति पञ्चमस्कन्धे

मार्तण्डपदानिर्वचनं ॥ तेन श्रीमदाचार्यैः भक्तिमार्गप्रकाशने अकृत एतस्य जगतोमृतप्रायत्वं योजितं । तदेव श्रीवल्लभाष्टके नाविर्भूयाद्भवानिति श्लोके व्युत्पादितं॥ तदेतन्मत्कृततद्विवृतिटिप्पणादवगन्तव्यं। एवं ग्रन्थकरणं प्रतिज्ञाय तस्य विद्वदुपयोगित्वं वदन्तो विदा ज्ञानेन ठाः शून्याः तान् लातीति स्वनामयोगस्मारणेन स्वस्य दयालुत्वमपि बोधितं। श्रुतीति । आदिपदेन गीतादिस्मृतिग्रहणं । मणिमृष्टस्यापि मण्डनस्य मुक्ताभिः शोभातिशयात् अत्र तदनुकूलतन्मूलकयुक्तीनां तथात्वं एवं ग्रन्थोपयोगमुक्त्वा तमारभमाणा विषयं संशयश्च स्फुटीकुर्वन्ति ॥

End :

अत एव च जगतो ब्रह्मोपादानत्वं। अतएव च सर्वेषां शब्दानां ब्रह्मसामानाधिकरण्यं॥ मुख्यवृत्तमित्यादि ॥ अत्र यद्यपि प्रतिज्ञोपपद्यते। तथापि दृष्टान्तोपरोधो दुर्वारः अत एव स आत्मानं स्वयम् ॥

---

29. सेवाकल्पतरुः.

Beginning :

श्रीविट्ठलं शार्ङ्गधरं प्रणम्य करुणामयम् ।
सेवाकल्पतरुः पुण्यः सतां प्रीत्यै प्रकाश्यते ॥

अथेदं विचार्यते भगवतः श्रीनन्दराजकुमारस्य सेवास्वरूपं कीदृशम् तत्र के वाधिकारिणः किं फलमिति च ।

अत्रेदं निर्धारितमुत्तरम् । भगवत्प्रतिकृत्याराधनोपचारादिलक्षणमेव सेवास्वरूपं भगवन्मार्गप्रविष्टा एवाधिकारिणः भगवत्प्रसादप्राकट्यलीलासायुज्यादिलक्षणं फलमिति च। तथैव श्रीभागवतवचनैरवधारितत्वात्। ननु "मानसी सा परा मते" ति पुष्टिप्रवर्तकाचार्यवचनेन मानसिकसेवाया एव मुख्यत्वावगमात् । कथं प्रतिकृत्याराधनं सेवास्वरूपमिति वक्तुं शक्यमिति चेदत्रोच्यते ॥

* * * *

इति श्रीमुरलीधरदासकृतसेवाकल्पतरौ भगवत्सेवास्वरूपनिरूपणं नाम प्रथमस्तबकः ॥ . . . .

इति श्रीमुरली . . . . . . तरौ भगवत्सेवाधिकारिलक्षणनिरूपणं नाम द्वितीयस्तबकः . . . . .

End:

तस्माद्भगवत्सेवाया भगवत्प्रसादप्राकट्यलीलासायुज्यरूपाणि त्रीण्यपि मुख्यफलानीति सर्वं समञ्जसम् ॥

नन्दगोपकुमारोऽयमानन्दात्मा सुहृत् सताम् ।
इन्दिराहृदयानन्दः प्रसीदतु सदा हरिः ॥

श्रीशार्ङ्गपाणेः कृपया सेवाकल्पतरुः शुभः ।
प्रकाशितः पुष्टिभक्तिफलदः सद्भिराश्रितः ॥

Colophon:— इति श्रीमुरलीधरदासकृतौ सेवाकल्पतरौ भगवत्सेवाफलनिरूपणं नाम तृतीयस्तबकः ॥

---

30. सन्यासनिर्णयः.

Beginning:

प्राप्ततापनिवृत्त्यर्थं परित्यागो विचार्यते ।
स मार्गद्वितये प्रोक्तो भक्तिज्ञाने विशेषतः ॥

कर्ममार्गे न कर्तव्यः सुतरां कलिकालतः ।
अतः प्राप्ता भक्तिमार्गे कर्तव्यत्वविचारणा ॥

* * * *

End :

तस्मादुक्तप्रकारेण परित्यागो विधीयताम् ।
अन्यथा भ्रश्यते स्वार्थादिति मे निश्चिता मतिः ॥
इति कृष्णप्रसादेन वल्लभेन विनिश्चितम् ।
सन्यासवरणं भक्तौ अन्यथा पतितो भवेत् ॥

---

31. पुष्टिप्रवाहमर्यादा.

Beginning :

पुष्टिप्रवाहमर्यादा विशेषेण पृथक् पृथक् ।
जीवदेहक्रियाभेदैः प्रवाहेण फलेन च ॥
वक्ष्यामि सर्वसन्देहो न भविष्यति यच्छ्रुतेः ।
भक्तिमार्गस्य कथनात् पुष्टिरस्तीति निश्चयः ॥
द्वौ भूतसर्गावित्युक्तेः प्रवाहोऽपि व्यवस्थितः ।
वेदस्य विद्यमानत्व(ा)न्मर्यादापि व्यवस्थिता ॥

* * * *

End :

सोऽपि तैः तत्कुले जातः कर्मणा जायते यतः ।

Colophon :— इति श्रीमदाचार्यचन्द्रवर्णितपुष्टिप्रवाहमर्यादा संपूर्णा ॥

---

32. बालबोधः.

Beginning :

नत्वा हरिं सदानन्दं सर्वसिद्धान्तसङ्ग्रहम् ।
बालप्रबोधनार्थाय वदामि भुवि निश्चितम् ॥
धर्मार्थकाममोक्षाख्याश्चत्वारोऽर्था मनीषिणाम् ।
जीवेश्वरविचारेण द्विधा ते हि विचारिताः ॥

अलौकिकास्तु वेदोक्तास्साध्यसाधनसंयुताः ।
लौकिका ऋषिभिः प्रोक्तास्तथैवेश्वरशिक्षया ॥

* * * *

End:

तदाश्रयतदीयत्वबुद्ध्यै किञ्चित् समाचरेत् ।
स्वधर्ममनुतिष्ठन्वै भारद्वैगुण्यमन्यथा ।

* * * *

इत्येवं कथितं सर्वं नैतज्ज्ञाने भ्रमः पुनः ॥

Colophon:— इति श्रीमदाचार्यविरचितो बालबोधस्सम्पूर्णः ॥

---

33. भक्तिहंसः ॥

Beginning:

जयन्ति पितृपादाब्जरेणवो यत्प्रसादतः ।
भक्तिः प्राप्ता तदन्याद्व्यामोहाभावश्च पण्डितैः ॥
मन्त्रोपासनवैदिकतान्त्रिकदीक्षार्चनादिभिः सम्यक् ।
योऽस्पृष्टो रमते निजभक्तेषु समेऽस्तु सर्वस्वम् ॥

ननु किमिदमपूर्वतरमिहोच्यते सत्यमपूर्वतममपि ॥ श्वभ्रकूपपतितभेकसदृशां न तु विदुषां पूर्वमेवानेकप्रमाणसिद्धत्वात् । तथा हि "नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुश्रुतेन यमेवैष वृणुते तेन लभ्य" इति श्रुतौ यमेवेति सामान्योक्त्याग्रिमेण च भगवदङ्गीकारमात्रैकलभ्यत्वोक्त्या प्रवचनादिपदान्यात्मीयत्वेन भगवदङ्गीकारातिरिक्तयावत्साधनोपलक्षकानीति ज्ञायते ॥ . . .

End:

द्वयोस्सारूप्यात्तद्भ्रमहतिकृते मानसगतं
मुदा भक्तेर्हंसं प्रकटमकरोद्विठ्ठलकृतिम् ।

व्रजामिचरणं हरेश्शरणमैहिकामुष्मिके
निरस्तनिजसंशयो य इह भाग्यवद्भिः स्मृतः ॥
व्रजेशसुतपादपङ्कजपरागरागाश्रितं ।
करोति सततं हि मां निजतनूजवात्सल्यतः ॥

Colophon :— इति श्रीगोपीजनवल्लभचरणैकतानश्रीविठ्ठल विरचिते भक्तिहंसस्सम्पूर्णः ॥

---

34. भक्तिचिन्तामणिः ॥

Beginning:

श्रीवल्लभप्रसादेन भक्तिचिन्तामणिः शुभः ।
श्रीभागवतसारार्थमनुसृत्य वितन्यते ॥
विठ्ठलो वल्लभसुतः प्रसीदतु हरिः स्वयम् ।
गुरुर्मे भगवान् कृष्णः परमानन्दविग्रहः ॥

अथेदं विचार्यते भगवतो नन्दराजकुमारस्य प्रीतिसाधनं किमिति अत्राहुराचार्याः ॥

प्रेम्णोऽन्यत्साधनं लोके नास्ति मुख्यं परं हि तत् ।
श्रीभागवतमेवात्र परं तस्य हि साधनम् ॥
अधिकारमभिप्रायं ज्ञात्वा भक्तमुखेन हिं ।
सकृच्छ्रवणमात्रेण कृष्णे प्रेम भवेद्ध्रुवम् ॥
विरक्तो विपरीतादिभावनारहितस्तथा ।
लीलामात्रश्रुतौ तस्य भवेत्प्रेमाखिला किमु ॥
न दृष्टः श्रुतपूर्वो वा भजन् कृष्णमनामयम् ।
न मुक्तः सर्वथा यस्मात् गोपाग(।)वस्तथाभवत् ॥

प्रेम्णैव सेवितोऽत्यर्थं गोपीनां कामदो यतः। इति
प्रेमाभावे मध्यमस्स्यात् ज्ञानाभावे तथादिमः ॥
उभयोरप्यभावे तु पापनाशस्तदा भवेत् ॥

इति च तस्मात्प्रेमैव भगवत्कृपासाधनं मुख्यमिति श्रीभागवत-राद्धान्तः ॥ . . . . .

End :

अदीनलीलाहसितेक्षणोल्लसद्भ्रूभङ्गसंसूचितभूर्यनुग्रहत्वात् भगवतः भक्तकामपूरणे न विलम्बं करोति भगवद्वशीकरणाचरणाया भक्तेश्चिन्तामणिरूपत्वाद्भगवत्प्रतिकृतिसेवनप्रणामध्यानकीर्तनानुरागादिशीलैर्भक्तैः नित्यदा भगवति विश्वास एव कार्यः सर्वसुहृत्वादिति सर्वं समञ्जसम् ॥

भक्तिचिन्तामणिं कण्ठे धृत्वा भगवतः प्रियाः।
पश्यन्तु करुणासिन्धुं कौस्तुभामुक्तकन्धरम् ॥

विठ्ठलः करुणासिन्धुः स्वयमुद्यम्य रक्षकः।
प्रीयतां वेणुगोपालो माधवो हरिरद्भुतः ॥

Colophon :— इति श्रीमुरलीधरदासकृतः भक्तिचिन्तामणिः समाप्तः ॥

---

35. सम्प्रदायकुलदीपिका ॥

Beginning :

अथ सम्प्रदायकुलदीपिका ॥

योऽनुग्रहार्थं श्रुतिगोपिकानां गिरीन्द्रधर्ताजनि रासमध्ये
बभूव भूयः स कलौ किलेशः स्वाम्यन्तविष्ण्वादिपदैकनामा।
स एव भूयोऽजनि वल्लभाख्यः स्वकीयमाहात्म्यमवादि येन
नत्वा त्रिरूपं तमहं करोमि तत्सम्प्रदायक्रममनुक्तपूर्वम् ॥

श्रीवल्लभाख्यात्मजविठ्ठलेशे प्रशासति प्राणिहितैकहेतौ ।
मार्गं तदीयं किल यस्य शिष्यो गदाभिधो वक्ति यथामतीदम् ॥

तत्रादौ पलादिकालमानः ।

बर्हापीडं मौलौ बिभ्रद्वंशीनादानातन्वन्
आकल्पश्रीसम्पन्नो गोपस्त्रीभिः संवीतः ।
नेत्रानन्दं कुर्वन् कृष्णस्त्वचेदस्मान्वीक्षेथाः
सर्वे कामास्सम्पद्येरन्नस्माकं ह्यद्यासीनाः ॥

एवं गुर्वक्षरषष्ट्या एकं पलमुच्यते। पलषष्ट्यैका घटिका भवति। घटिकाषष्ट्याहोरात्रं मनुष्याणां । त्रिंशद्भिरहोरात्रैर्मासः । मासैर्द्वादशभिर्वर्षम् । वर्षाणां सप्तदशलक्षैरष्टाविंशतिसहस्राधिकैः कृतं भवति (17,28,000) । द्वादशलक्षैः षण्णवतिसहस्राधिकैः (12,96,000) त्रेता। अष्टलक्षैश्चतुष्षष्टिसहस्राधिकैर्द्वापरम् (8,64,000) । चतुर्लक्षैर्द्वात्रिंशत्सहस्राधिकैः (4,32,000) कलिर्भवति । एवं चतुर्युगम् एकसप्ततिचतुर्युगैः मन्वन्तरमाहुः ।

End :

ततोऽग्निरूपो भगवान् श्रीवल्लभ इति श्रुतः ।
प्रादुर्बभूव तस्मै स प्राह कृष्णेच्छयान्वितः ॥
श्रीवल्लभसुतः श्रीमान् श्रीविठ्ठल इति प्रभुः ।
तेन श्रीवल्लभात्प्राप्तं रहस्यं राधिकापतेः ।
श्रीविठ्ठलसुताः सर्वे ख्याता गिरिधरादयः ।
कुर्वन्तो भगवद्भक्तिं आयुष्मन्तो भवन्त्विह ॥

श्रीवल्लभप्रोक्तं सर्वतोऽधिकं वसुपञ्चकं भगवता स्थापितम् । गुरुसेवा भागवतार्थः भगवत्स्वरूपनिर्णयो भगवत्सेवा नैरपेक्ष्यमिति ॥

श्रीवल्लभोक्तमार्गेण कृष्णसेवापरास्सदा ।
भवन्तु सुखिनस्सर्वे श्रीकृष्णस्य प्रसादतः ॥
तेषु नित्यं प्रसन्नोऽस्तु श्रीमद्वल्लभनन्दनः ।
मदन्वयस्वीकरणे सदा भवतु वल्लभः ॥

श्रीमन्नृपतिविक्रमादित्यसमयात् षोडशशताधिकदशमसंवत्सरे (1610) श्रीमद्वृन्दावने द्विवेदिगदाख्येन ग्रन्थोऽयमकारि ॥

इति श्रीसम्प्रदायकुलदीपिकायां श्रीकृष्णाख्यब्रह्मनिर्णयनिरूपणन्नाम पञ्चमं प्रकरणं समाप्तम् ॥

Contents of the Book :

1. श्रीवल्लभदीपशिखे तन्मार्गकथनम् ॥
2. श्रीवल्लभदीपशिखे श्रीविष्णुस्वामिचरितम् ॥
3. श्रीवल्लभशिखे सम्प्रदायोत्पत्तिनिरूपणम् ॥
4. श्रीवल्लभनिरूपणम् ॥
5. श्रीकृष्णाख्यब्रह्मनिर्णयनिरूपणम् ॥

---

36. भक्तिहेतुनिर्णयः ॥

विठ्ठलकृतः ॥

Beginning:

भक्तिहेतुनिर्णयप्रारम्भः ॥

ब्रह्मादिदुर्लभकथं राधामानापनोदकं कृष्णम् ।
तदनुग्रहैकलभ्यां भक्तिं च नुमस्तदीयांश्च ॥

नन्विदमनेकप्रमाणविसंवादीव भाति । यदनुग्रहै(हे)तरसाधनासाध्यत्वं भक्तौ ॥ तथा हि ॥ एकादशस्कन्धे " श्रद्धामृतकथायां म "

इत्युपक्रम्य "इष्टं दत्तं हुतं जप्तं मदर्थं च कृ(कृ)तं तपः ॥ एवं धर्मैर्मनु-ष्याणामुद्धवात्मनिवेदिनाम्" ॥

* * * *

End:

"स जहाति मतिं लोके वेदे च परिनिष्ठिता" मिति वाक्यात् तादृशा-नुग्रह एव भक्तिमार्गे लोकवेदातीतत्वज्ञानं विश्वासश्चेति तद्रहितेषु तद-धिकनिरूपणं व्यर्थमिति तद्वत्सु स्वज्ञानलेशमात्रमेतेन प्रकाशितमित्यलं विस्तरेण ॥

गोपीशपदसर्वस्वः पितृपादाब्जसेवकः ।
निर्णीतवान् भक्तिहेतुं निगूढाशयविठ्ठलः ॥

Colophon :— इति भक्तिहेतुनिर्णयस्समाप्तः ॥

---

37. भक्तिहेतुविवृतिः (भक्तिहेतुनिर्णयव्याख्या) ॥
रघुनाथविरचिता ॥

Beginning:

अथ भक्तिहेतुटीकाप्रारम्भः ॥

नमो भक्तिरसास्वाददात्रे वल्लभसूनवे ।
कलिकल्मषघातिन्यै तद्वाण्य(ण्यै) च नमस्सदा ॥

भक्तेरसाधारणकारणं निश्चिकीर्षवो नुतिरूपं मङ्गलमाचरन्ति। ब्रह्मा-दीति उत्तमाधिकारिणामपि ब्रह्मादीनां श्रोतुं दुर्लभा कथा यस्य राधाया मानं चित्तसमुन्नतिमपनुदति तथा। तं वल्लभं नुमः स्तुम इत्यर्थः ॥

* * * *

End:

तद्वत्सु भक्तिमार्गे लोकवेदातीतत्वज्ञानविश्वासवत्स्वित्यर्थः ॥

भक्तिहेतुं विनिश्चित्य प्रवृत्तो भजने तु यः ।
तन्मनस्तोषकारिण्यस्त्वियं कृतिरखण्डिता ॥

श्रीविठ्ठलपदाम्भोजस्मृतिमात्रहताशुभः ।
कृतवान्रघुनाथोऽहं भक्तिहेतुप्रकाशनम् ॥

Colophon :— इति श्रीमद्वल्लभनन्दनचरणैकशरणश्रीरघुनाथस्य कृतौ भक्तिहेतुविवृतिः समाप्ता ॥

---

38. भगवन्नामदर्पणम् ॥

Beginning :

श्रीनन्दराजतनयं प्रणम्य हरिमादरात् ।
पुष्ठिभक्तमुदे कुर्मो भगवन्नामदर्पणम् ॥

श्रीवल्लभसुतः श्रीमान् विठ्ठलः स्वगुरुर्हरिः ।
अत्र दद्यान्मतिं मह्यमन्तरात्मा सतां प्रियः ॥

अथेदं विचार्यते श्रीबृन्दावनचन्द्राभिधः पुष्टिपुरुषोत्तमः केवलानन्दानुभवलक्षणं स्वरासलीलामन्यांश्च दिव्यास्स्वलीलाः केन साधनेनेदानींन्तनभक्तानां प्रसन्नः प्रदर्शयिष्यति ॥

* * * *

इति श्रीभगवन्नामदर्पणे नाम्नां स्तुतिरूपत्वनिरूपणं नाम प्रथमं प्रकरणम् ॥

* * * *

इति भगवन्नामदर्पणे कीर्तनस्य स्वतन्त्रसाधनत्वनिरूपणं नाम द्वितीयं प्रकरणम् ॥

* * * *

इति . . . . शुद्धपुष्टिभक्तानां भगवत्कीर्तनसुखाधिक्यनिरूपणं नाम तृतीयं प्रकरणम् ॥

* * * *

End :

भागवतपठनाशक्तानामपि श्रीकृष्णश्शरणं ममेति कीर्तनेन भगवान् सन्तुष्टः स्वलीलासायुज्यं दिशतीति सर्वं समञ्जसम् ॥

शार्ङ्गचक्रगदाशङ्खखड्गपाणिरधोक्षजः ।
पात्वस्मान्नित्यदा कृष्णो वेणुवाद्यविशारदः ॥
श्रीविठ्ठलप्रसादेन निर्मितं नामदर्पणम् ।
दृष्ट्वा कृष्णैकशरणः पुष्टिभक्तो भवेद्ध्रुवम् ॥

Colophon :— इति श्रीविठ्ठलनाथकृपामृतपुष्टेन मुरलीधरदासेन कृते भगवन्नामदर्पणे कीर्तनस्वरूपशोधनं नाम तृतीयं प्रकरणम् ॥

कृष्णनाम्नि दृढा भक्तिः भूयात्कृष्णप्रसादतः ।
मदीयानाञ्च मह्यञ्च पुष्टिमार्गानुसारतः ॥

श्रीकृष्णः शरणं मम ॥ श्रीरामचन्द्रो जयति ॥

---

39. प्रेमभक्तिरसायनम्.

Beginning :

श्रीविठ्ठलमनुस्मृत्य वल्लभार्यसुतं हरिम् ।
वर्णयामि यथाबुद्धि प्रेमभक्तिरसायनम् ॥
प्रेमभक्तिरसं पीत्वा पश्येद्गोपीजनप्रियम् ।
मुरलीगानरसिकं मुकुन्दं नन्दनन्दनम् ॥

अथात्र विचार्यते जीवाः केनोपायेन भगवदवियोगं प्राप्नुवन्ति । अवियुक्ताश्च केन प्रकारेण भगवदनुभवं कुर्वन्तीति च ननु त्रिविधपरिच्छेदरहितस्य पुरुषोत्तमस्य तदंशरूपाणां जीवानाञ्च वियोग एवासम्भावित इति चेत् सत्यं तथापि जीवगतानन्दांशस्य षाड्गुण्यस्य च नारायणोदराद्विनिर्गमसमय एव तिरोहितत्वात्सच्चिदंशयोरनुवृत्तत्वेऽपि तिरोहितधर्मरूपज्ञानत्वात् प्रवाहे पतितानां जीवानां हृदिस्थोऽपि अतिदूरस्थः कर्मविक्षिप्तचेतसां इति वाक्यरीत्या भगवद्भावशून्यत्वाच्च ॥

* * * * *

End:

एवमवियोगोपायश्चिन्तितः अवियुक्तानां भगवदनुभवप्रकाराः पञ्च सालोक्यसारूप्यसामीप्यसायुज्यरूपाश्चत्वारः रासलीलादिलक्षणभजनानन्दानुभवश्चैक इति प्रेमभक्तिरसायनभोक्तार एव पञ्चधा भगवदनुभवयोग्या भवन्तीति सर्वं समञ्जसम् ॥

रामचन्द्रप्रसादेन प्रेमभक्तिरसायनम् ।
वर्णितं भगवद्भक्ता भोक्तारोऽत्र विशेषतः ॥

विठ्ठलश्चम्पकाधीशः प्रसीदतु हरिःस्वयम् ।
मुरलीगानरसिको भगवान् करुणानिधिः ॥

Colophon:— इति प्रेमभक्तिरसायनं सम्पूर्णम् ॥

---

40. परतत्त्वाञ्जनम् ॥

Beginning:

परतत्त्वाञ्जने प्रथमं दर्शनम् ॥ श्रीकृष्णः शरणं मम ॥

गोपीशगुणगातारं प्रेमानन्दरसाप्लुतम् ।
ध्यायामि नित्यदा नाथं विठ्ठलं वल्लभात्मजम् ॥१॥

श्रीविठ्ठलप्रसादेन परतत्त्वाञ्जनं शुभम् ।
प्रकाशयामि गोविन्दनिधिप्रापकमद्भुतम् ॥२॥

महानिधिरयं कृष्णो महर्षिगणपूजितः ।
तत्राञ्जनं भागवतं शुकप्रोक्तं सनातनम् ॥३॥

श्रीभागवतशास्त्रज्ञाः स्वानन्दनिधिमच्युतम् ।
भजन्ति नन्दतनयमुदारं पुरुषोत्तमम् ॥४॥

भजनानन्ददातारं परमानन्दमच्युतम् ।
प्रपद्ये पुण्डरीकाक्षं भक्तचातकवारिदम् ॥५॥
कोटिकन्दर्पलावण्यं श्रीभागवतसंस्कृतम् ।
प्रपद्य करुणापूर्णं लिखामि तदनुग्रहात् ॥६॥

अथेदं विचार्यते निखिलनिगमगुह्यं पूर्णानन्दप्रदं परतत्वं कीदृशमिति तत्प्रापकं मुख्यसाधनं कीदृग्रूपमिति च आद्यं श्रीनन्दराजकुमारलक्षणं घनश्यामत्व पद्माक्षत्व कृपासमुद्रत्व मुरलीधरत्व गोपीजनवल्लभत्व निस्साधनजनोद्धारकत्व स्वयमुद्यम्यरक्षकत्व वेणुगानमाधुर्येणाश्रयपुष्टिसुखप्रदत्व निखिलकल्याणगुणरत्नाकरत्व दीनचातकमेघत्व अमोघानुग्रहैकस्वभावत्व प्रागल्भ्यमाधुर्यौदार्यगाम्भीर्यसौशील्यादिरञ्जितस्वजनत्व श्रीभागवतवेद्यत्वादिकञ्च तस्य साहजिकं द्वितीयं तद्गुणकर्मश्रवणकीर्तनप्रेमादिलक्षणमिति राद्धान्तः ॥ . . . .

इति श्रीविठ्ठलनाथचरणकमलपरागोपजीविना मुरलीधरदासेन कृते परतत्त्वाञ्जने घनश्यामत्वरूपभगवल्लक्षणनिरूपणं नाम प्रथमं दर्शनम् ॥
. . . .

End:

पुष्टिमार्गे भगवत्कृपयैव भगवान् लभ्यः भगवद्विषयकदृढानुरागोऽपि लभ्य इति भगवल्लक्षणनिधिप्राप्तौ भगवत्कृपासंपादकं श्रीभागवतं मुख्यमञ्जनम् ॥ तदुक्तरीत्यैव भक्तैर्भगवानादरणीय इति सर्वं समञ्जसम् ॥

शार्ङ्गपाणेः प्रसादेन परतत्त्वाञ्जनं शुभम् ।
रचितं भगवद्दासश्रवणानन्ददायकम् ॥
भगवान् गोपिकापुत्रः परमानन्दविग्रहः ।
तुष्यतां करुणासिन्धुः स्वकीयप्रीतिवर्धकः ॥

:

वनमालाधरः श्रीमान् वन्यपुष्पावतंसकः ।
मह्यं प्रसीदतु हरिः गोपीमण्डलमण्डनः ॥

Colophon :—इति श्रीविठ्ठलनाथस्मरणधन्येन मुरलीधरदासेन कृते परतत्त्वाञ्जने भगवत्कीर्तनश्रवणप्रेमादीनां भगवत्प्रापकत्वनिरूपणं नाम चतुर्दशं दर्शनम् ॥

हृदिस्थः करुणासिन्धुः प्रेरकः पुरुषोत्तमः ।
स्वतन्त्रस्स्वीयवश्योऽसौ तुष्यतां मे सदा हरिः ॥

Contents of the work :

1. घनश्यामत्वरूपभगवल्लक्षणनिरूपणम् ।
2. पद्माक्षत्वरूपभगवल्लक्षणनिरूपणम् ।
3. कृपासमुद्रत्वरूपभगवल्लक्षणनिरूपणम् ।
4. मुरलीधरत्वरूपभगवल्लक्षणनिरूपणम् ।
5. गोपीजनवल्लभत्वरूपभगवल्लक्षणनिरूपणम् ।
6. निस्साधनजनोद्धारकत्वरूपभगवल्लक्षणनिरूपणम् ।
7. स्वयमुद्यम्यरक्षकत्वरूपभगवल्लक्षणनिरूपणम् ।
8. वेणुगानमाधुर्येणाश्रयंपुष्टिसुखप्रदत्वरूपभगवल्लक्षणनिरूपणम् ।
9. निखिलकल्याणगुणरत्नाकरत्वरूपभगवल्लक्षणनिरूपणम् ।
10. दीनचातकमेघत्वरूपभगवल्लक्षणनिरूपणम् ।
11. अनुग्रहैकस्वभावत्वरूपभगवल्लक्षणनिरूपणम् ।
12. प्रागल्भ्यादिगुणरञ्जितस्वजनत्वरूपभगवल्लक्षणनिरूपणम् ।

13. श्रीभगवनवेद्यत्वरूपभगवल्लक्षणनिरूपणम् ।
14. भगवत्कीर्तनश्रवणप्रेमादीनां भगवत्प्रापकत्वनिरूपणम् ।

---

41. भक्तिसूत्रभाष्यम्.

Beginning:

श्रीनन्दतनयं कृष्णं राजगोपालमीश्वरम् ।
आश्रये पुष्टिमार्गैकप्राप्यमानन्ददायिनम् ॥
परभक्तिमतां प्राप्यं परमानन्दविग्रहम् ।
मुरलीगानरसिकं वन्दे नन्दसुतं प्रभुम् ॥
श्रीराधिकासहायस्य वेण्वंशस्य गुरोर्मम ।
प्रसादाद्भक्तिमीमांसां व्याख्यास्ये सुहृदां मुदे ॥

अथ भगवान् शाण्डिल्यमहर्षिर्भगवद्गीताभागवततत्वसूत्रश्रुतिपुराणादिषु भक्त्यैकलभ्यत्वं भगवतो नन्दराजकुमारस्य नियतलिङ्गमिति बादरायणादिभिः भगवदीयैर्व्यवसितमिति ज्ञात्वा साधकभक्तिपरिज्ञानाय भगवत्स्वरूपं विविच्य वक्ष्यन् तद्विवित्साया आवश्यकत्वं प्रतिजानीते ॥ अथेति ॥ अथातो भक्तिजिज्ञासा ॥ १ ॥

अथ शब्द आनन्तर्यवाची अनायासेनाश्रितजनसंसारदुःखविध्वंसकस्य परमप्राप्यस्य नन्दराजकुमारस्य महिमयाथात्म्यप्रतिपादकबादरायणकृततत्त्वसूत्रार्थपरिज्ञानानन्तरमित्यर्थः । अतश्शब्दः हेत्वर्थकः.

End:

क्रियाफलसंयोगाद्धेतोरित्यर्थः "अमोघा भगवद्भक्तिर्नेतरे"ति काश्यपवचनाद्भगवद्भक्तिरेका परमपुरुषार्थदा स्वयं पञ्चमपुरुषार्थरूपिणीति सर्वं समञ्जसम् ॥

नन्दस्य तनयं कृष्णं रासलीलारतं सदा ।
आश्रये मुरलीगानरसिकं विठ्ठलात्मकम् ॥
जयते चम्पकाधीशः सत्यभामासहायवान् ।
आत्मभक्तजनश्रेष्ठः परमानन्दविग्रहः ॥

श्रीकृष्णः शरणं मम ॥

---

42. ब्रह्मसूत्रभाष्यम्.

Beginning:

श्रीगोपीजनवल्लभाय नमः.

श्रीवल्लभांशसम्भूतं वल्लभाचार्यमीप्सितम् ।
नित्यं दास्यैकलाभाय सानुगः संश्रयाम्यहम् ॥
पुनरपि नमामि गोपीपतिरिति मार्गप्रवर्तनाचार्यान् ।
श्रीवल्लभाभिधानान् पितृचरणान्वाङ्मनःकायैः ॥

अथातो ब्रह्मजिज्ञासा ॥ १ ॥

इदमत्र विचार्यते वेदान्तानां विचार आरम्भणीयो नवेति किन्तावत्प्राप्तं नारम्भणीयमिति । कुतः ॥

साङ्गोऽध्येयस्सदाध्येयो वेदश्शब्दश्च बोधकः ।
निस्सन्दिग्धं तदर्थश्च लोकवद्वाक्यतस्तु यः ॥

अर्थज्ञानार्थं विचार आरम्भणीयः । तस्य च ब्रह्मरूपत्वात्

* * * *

ब्रह्मजिज्ञासा कर्तव्येति व्यासोक्तत्वादपि कर्तव्यता कर्तव्यपदाध्याहारे स्वातन्त्र्यं न भवति अन्यथा 'अथ योगानुशासनमि' तिवत् स्वतन्त्रता

स्यात्। तथा च ज्ञानानुपयोगः। तथा हि। तं त्वौपनिषदं पुरुषं पृच्छामीति केवलोपनिषद्वेद्यं ब्रह्म न शास्त्रान्तरवेद्यं तद्यदि मीमांसा स्वतन्त्रा स्यात् तज्जनितं ज्ञानं ब्रह्मज्ञानं भवेत् । अथवाध्याहारकरणापेक्षयाथशब्द एवमधिकारो व्याख्येयः ॥

* * * *

End:

श्लिष्टोऽर्थो ज्ञेयस्तथा सति परमफलमग्रे स्वतएव भावितभाव इत्यलमतिविस्तरेण ॥

जानीत परमं तत्वं यशोदोत्सङ्गलालितम् ।
तदन्य इति ये प्राहुरसुरांस्तानहो बुधाः ॥

नानामतध्वान्तविनाशकृत्तमो
वेदान्तहृत्पद्मविकासने पटुः ।
आविःकृतोऽयं भुवि भाष्यभास्करो
बुधा मुधा धावत नान्यवर्त्मसु ॥

पुरन्दरमदोद्भवप्रचुरवृष्टिसंपीडित
स्वकीयवरणोत्कुलावनपरायणो लीलया ।
स्मितामृतसुवृष्टिभिः परिपुपोष तान्यो गिरिं
दधार च स एव हि श्रुतिशिरस्सु संराजते ॥

Colophon :—इति श्रीमद्वेदव्यासमतवर्तिवल्लभाचार्यविरचिते ब्रह्मसूत्राणुभाष्ये चतुर्थाध्यायस्य चतुर्थः पादः ॥

43. नारायणभट्टकृतप्रयोगरत्नम्.

Beginning:

श्रीरामं सपरीवारं गणेशं च सरस्वतीम् ।
आश्वलायनतच्छिष्यान् प्रणम्य पितरं गुरुम् ॥
भट्टरामेश्वरसुतो भट्टनारायणः सुधीः ।
प्रयोगरत्नं कुरुते काश्यां शिष्टेष्टतुष्टये ॥
अथे(र्थे)ऽस्मिन् गुणगणवत्त्वमुच्यते चेत्
स्वग्रन्थं गुणगणवन्तमाह को न(नु) ।
तत्सन्तः शिरसि कृताञ्जलिस्तु याचे
शोध्यं तत्सदसदिहोच्यते मया तत् ॥

अथ संस्काराः ॥ ते चाष्टाचत्वारिंशत् ॥ तथा च गौतमः ॥ गर्भाधानपुंसवनसीमन्तोन्नयनजातकर्मनामकरणान्नप्राशनचौलोपनयनचत्वारि वेदव्रतानि स्नानं सहधर्मचारिणीसंयोगः ॥

*   *   *   *

End:

कृत्तिकादिषु काम्यश्राद्धं वृत्तिकारमतेनाष्टकाश्राद्धवत्सर्वं कार्यं ॥ यद्वा शौनकोक्तरीत्या वृद्धिश्राद्धवत् ॥

Colophon:— इति श्रीभट्टरामेश्वरसूरिसूनुनारायणभट्टकृतप्रयोगरत्नेऽष्टकविकृतिश्राद्धप्रयोगः ॥

बहुधान्यसंवत्सरमार्गशीर्षशुद्धप्रतिपदा(दि) भानुवारे इदं नारायणभट्टीयपुस्तकं माचेगणशेषेण लिखितम् ॥

Index to the subject-matter of Prayōgaratnam.

इति नारायणभट्टीयविषयाः ॥

---

44. स्वच्छन्दपद्धतिः.

Beginning:

कला—पमस्थायी नीलकण्ठाश्रमी यतिः ।
वाराणसीशिरोरत्नं फणिभाषितपारगः ॥

चिदानन्दाश्चिदाभासो मन्वतन्त्वैकजन्मभूः ।
वंशालयपुरस्थायी तच्छिष्यो माधवात्मजः ॥

कविराजपदं तस्मै गजैश्च तुरगैस्सह ।
अर्पितं शिवराजेन राजदुर्गनिवासिना ॥

तेन बाल्यजवेषाय श्रीविद्याराधनक्रमे ।
पद्धतिस्सिद्धसरणिस्संक्षेपेण विरच्यते ॥

श्रीगुरुभ्योनमः ॥ तत्रादौ श्रीमान् साधकेन्द्रः प्रातःसन्ध्यापूर्वक-दण्डद्वयात्मके रात्रौ तुरीययामे ब्राह्मे मुहूर्ते वा शय्यायास्समुत्थाय रात्रिवासं त्यक्त्वा अल्पे वाससी हस्तौ पादौ प्रक्षाल्य आचम्य शुचिः स्वान्तः शान्तः शुभासने उपविश्य स्वशिरसि सहस्रारकमलकर्णिकायां सिंहासनारूढं निजगुरुं ध्यायेत् ॥

End:

परदेवताभ्यो नैवेद्यादिकं दत्वा स्वयमपि सुहृद्भिरन्यैः सार्धं भुक्त्वा स्वात्मानं विश्वातीतं विभावयन् यथा सुखं विहरेदिति शिवं स्मरणं गुरुपादुकापञ्चकस्तोत्रं पठेत् ॥

Colophon:— इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्य श्रीमधुसूदनतीर्थविरचितायां स्वच्छन्दपद्धत्यां त्रयोदशस्पन्दः ॥

44*a*. क्रियाप्रदीपः.

Beginning:

श्रीदेवराजस्वामिनः पश्चिमाभिमुखस्य चतुराव(र)णयुक्तस्य मन्दिरस्य परिवाराच्च प्रयोगो वक्ष्यते । गर्भगृहद्वारे अधश्शाखायां शक्त्यै नमः ॥ दक्षिणशाखायां वागीश्वर्यै नमः । हरिश्रियै नमः उत्तरशाखायां रत्यै नमः। गर्भगृहद्वारोभयपार्श्वयोः दक्षिणे चण्डाय । वामे प्रचण्डाय । अर्धमण्डपद्वारे । दक्षिणे चक्रोत्तमाङ्गिने । वामे शङ्खोत्तमाङ्गिने । विमानदक्षिणभागे उदङ्मुखं स्थित्वा ओं विष्णवे प्रासादरूपिणे हुंफट्स्वाहा * इति विमानम् ॥

* * * *

End:

बलिपीठान्तं सर्वेभ्यः परिवारेभ्यो बलिं दत्वा ततो देवं प्रदक्षिणं कृत्वा प्रणम्य क्षमाप्य तत आचार्यं पूजयित्वा आचार्यदक्षिणां दत्वा ऋत्विजस्सम्पूज्य तेभ्योऽपि दक्षिणां दत्वा ततो ब्राह्मणेभ्यो यथाशक्ति दक्षिणां दद्यात् । पुण्याहवाचनप्रयोगो वक्ष्यते । विष्णुगायत्र्या गलन्तिकां प्रक्षाल्य प्रणवेनाम्बुपूरितां कृत्वा.

---

45. वृषाद्रिस्तोत्रम्.

Beginning :

श्रीशेषशिखरस्वामिन् रमाभृद्वक्षसस्तव ।
विकसत्पद्मसंकाशौ चरणौ शरणं भजे ॥

त्वत्कल्याणगुणाङ्कितामृतवचःपाली सुधास्यन्दिनी
नृत्यन्ती वदने स्वयं विलसते मूढस्य मे श्रीविभो ।
क्षोणीमण्डलसंस्थसर्वरसिकामोदानु
तत्परे वनमृगे व्यात्ता न किं चन्द्रिका ॥

वेदास्सर्वसुरेश्वरः कमलभूश्शम्भुश्च मन्वादयः
स्तोतुं यस्य महत्वमक्षमनमा व्यासादयश्चाभवन् ।
त्वद्दासस्त्वदुपाश्रितस्तव सुतस्तस्मादहं निर्भयः
स्वामिन् तादृशवैभवस्य भवतः कर्तुं यतिष्ये स्तवम् ॥

* * * * *

End :

श्रीशेषशैलशिखरे चिदचिद्विशिष्टं
श्रीसंश्रितोरसमपारकृपैकपात्रम् ।
आपादशीर्षमवलोक्य हरे जनास्त्वां
भक्ताभयप्रद सदैव मुदं लभन्ते ॥

अस्मद्गुरुवेङ्कटाचार्यचरणाम्बुजसंश्रितः ।
चकार रघुनाथार्यश्शेषभूभृद्विभोस्स्तुतिम् ॥

Colophon :— तिरुनन्ताल्वंशसञ्जातेन रघुनाथाचार्येण कृतं वृषाद्रिनामस्तोत्रं संपूर्णम् ॥

45*a*. अष्टश्लोकीव्याख्यानम्.

Beginning:

श्रीपराशरभट्टार्यः श्रीरङ्गेशपुरोहितः ।
श्रीवत्साङ्कसुतश्श्रीमान् श्रेयसे मेऽस्तु भूयसे ॥

अखिलचिदचिदीशः श्रीनिवासो दयालुः
स्वपदकमलयुग्मप्रापकस्संश्रितानाम् ।
निगमशिखरगम्यो नित्यमव्याजबन्धु-
र्विलसतु मम चित्ते वेङ्कटेशो मुकुन्दः ॥

प्रणम्य देशिकान् सर्वानष्टश्लोक्या यथा श्रुतम् ।
अर्थो वैष्णवदासेन बालबोधाय कल्प्यते ॥

अथ परमकारुणिको भगवान् श्रीपराशरभट्टार्यः सकलचेतनोज्जीवनाय सर्ववेदसारतया स्वरूपोपायपुरुषार्थप्रतिपादकतया च मुमुक्षुभिरनुसन्धेयस्य रहस्यत्रयस्य संप्रदायपरंपराप्राप्तमर्थं दर्शयितुकामः स्वरूपज्ञानपूर्वकत्वादभीष्टोपायप्रवृत्तेः स्वरूपप्रतिपादनपरं सकलशास्त्ररुचिपरिगृहीतं श्रीमदष्टाक्षरमन्त्रमादौ विवृणोति चतुर्भिः श्लोकैरथ द्वाभ्यां स्वरूपोपायपुरुषार्थप्रतिपादनपरं मन्त्ररत्नमथ द्वाभ्यां द्वयविवरणरूपं चरमश्लोकं तत्र सकलवेदसारसङ्ग्रहः प्रणवः ॥

प्रणवाद्यास्तथा वेदाः प्रणवे पर्यवस्थिताः ।
वाङ्मयं प्रणवं सर्वं तस्मात् प्रणवमभ्यसेत् ॥

अकारार्थो विष्णुर्जगदुदयरक्षाप्रलयकृ-
न्मकारार्थो जीवस्तदुपकरणं वैष्णवमिदम् ।
उकारोऽनन्यार्हं नियमयति सम्बन्धमनयो-
स्त्रयीसारस्त्र्यात्मा प्रणव इममर्थं समदिशत् ॥

*　　*　　*　　*

अकारार्थो विष्णुरिति । जगतां लोकानां उदयः उत्पत्तिः रक्षा संरक्षणं . . .

End :

शाखानामुपरि स्थितेन मनुना मूले नृलब्धात्मकः
सत्ताहेतुसकृज्जपेन सकलं कालद्वयेन क्षिपन् ।
वेदोक्तं सविहारसारथिगिरां गुम्भेन विस्रम्भितः
सारज्ञो यदि कश्चिदस्ति भुवने नाथस्य यूथस्य नः ॥

इत्यादिकमत्रानुसन्धेयं दृढोऽस्मीति स्वनिष्ठाप्रदर्शनप्रबन्धश्च निर्गमितः ॥

इत्थं बालप्रबोधार्थं अष्टश्लोक्या यथाश्रुतम् ।
वर्णितोऽर्थो महात्मानः क्षन्तुमर्हथ साहसम् ॥

Colophon :— अष्टश्लोकीव्याख्यानं संपूर्णम् ॥

---

456. सौन्दर्यलहरीव्याख्या (सुधाविद्योतिनी) ।

Beginning :

प्रशास्महे नमोवाकं प्रकाशानन्दमूर्तये ।
स्तनातिभारनम्राय गणेशायात्मदायिने ॥

अथ पूर्वजन्मसमयोपासनाह्लादितमत्या भगवत्याः स्तन्यामृतपानसमुल्लसितचित्तवृत्तिः प्रवरसेनाभिधः स्तोत्रराजरचनां चकार ॥

आसीत्प्रवरसेनाख्यः क्षत्रवंशशिखामणिः ।
यस्य बाल्यश्च वार्धक्यं विना यौवनवृद्धता ॥
द्राविडो नाम(राजा) तस्यासीत् द्रविडेषु पिता नृपः ।
तस्यामात्य(वरो)विद्वान् स्वधर्मनिरतो द्विजः ॥

तदधीनमतिस्सोऽथ पुत्रोत्पत्तौ समुत्सुकः ।
कृत्वा शुभानि कर्माणि वेदोक्तानि परन्तपः ॥

तस्य भार्या वेदवती परमामृतलोचना ।
पुत्रं प्रवरेसनाख्यं प्राप हस्तयुगांशके ॥

सिंहे लग्ने नवमचरमर्क्षे पिता देशिकेऽज्जं
याते सूर्ये मिथुनभवनं बोधने मीनयाते ।
शुक्रे कुम्भं तपनतनये गोपतौ नागभुक्ते
भौमे राज्यं विजयमुकुटे वेदमायार्थ(गाथार्थ्य)वेदी ॥

किञ्चिद्ध्यात्वा शुको विप्रः कुजान्मृगगतादयम् ।
भविष्यत्यरिहीनोऽपि कुशलं तस्य किं भवेत् ॥

प्रोवाच द्रविडं सोऽथ ते सुनो यदि जीवति ।
नृपासनाच्च्युतं नूनं भविष्यति कुलन्तव ॥

इत्युक्तस्सनृपः पुत्रं तत्याज गिरिमूर्द्धनि ।
अत्तुं तमागतो व्याघ्रस्तदा तत्र न दृष्टवान् ॥

मत्वा तं रत्नसङ्घातमादाय गतवान् बिलम् ।
पूर्वजन्मन्ययं विप्रः कुलीन इति विश्रुतः ॥

गङ्गासागरयोस्तीरे रामराजं चिरं भजन् ।
कदाचित्सलिले गाङ्गे मृतो हि न्यपतद्बुधः ॥

स वेदवत्यां तु . जातोऽयं द्रविडो नृपः ।
स बुध्वा पूर्वकर्माणि यौगिकानि परन्तपः ॥

अथारिमादौ सस्मार चतुर्दलसमन्वितम् ।
गुदलिङ्गान्तरालस्थं बालार्कसदृशप्रभम् ॥

सुषुम्नाधिष्ठितं दिव्यं ज्वलद्वर्णचतुष्टयम् ।
जलाग्न्यनलवातेशं साकिनीसहितं शिवम् ॥

तत्कर्णिकामध्यगतं तेजस्तत्वाग्रसङ्गतम् ।
स्वाधिष्ठानैर्दलैष्षड्भिर्जपाभैश्चातिशोभितैः ॥
सहितं काकिनीनीडं सुरेशं विश्वरञ्जनम् ।
मणिपूरकसंज्ञा स्यात् नृपेण गुरुणा मना ॥
स्वाधिष्ठान . . योगिनां मतभेदतः ।
सुखशतनूर्ध्वगतं मणिपूरकपश्चकं ॥
युक्तं दशदलैर्नीलैः . . र्णसहितैश्शुभं ।

* * * *

तदानीन्तस्य वदनकुहरं भारती शिवं ।
समुद्गता तद्विषया विचित्रपदशोभिता ॥
क्षिन्ना स्वरद्वयसन्तुष्टा गौरी दर्शनमागता ।

* * * *

त्रिलोपरि स्थितस्तस्य जिज्ञासुः पुलहो मुनिः ॥
ध्यात्वा बहुविधैर्मार्गै ।
यस्य सन्ध्ययोर्निरमाय वै ॥
हयमारुह्य नृपति ते राष्ट्रं पुनरागताः ।
कन्या रूपवती शुभा ॥
अस्याः पुत्रो(ऽहमगजा)स्तुतिव्याख्यां करोमि तां ।
सुधाविद्योतिनीं नाम्ना पित्रा सम्यक् प्रबोधितः ॥
तरणायाब्धिराजानं तृणकूटमिवाशया ।

यदाह

शिवश्शक्त्यायुक्तो यदि भवति(रजनि)शक्तः प्रभवितुं
न चेदेवं देवो न खलु कुशलस्पन्दितुमपि ।
अतस्त्वामाराध्यां हरिहरविरिञ्चादिभिरपि
प्रणन्तुं स्तोतुं वा कथमकृतपुण्यः प्रभवति ॥

End:

षट् इति चतुर्विंशमात्रयोगात् सकृदुच्चारणं अधिकारिणामेकाष्ट-पञ्चदशसंख्यो जपः ॥ इति कामराजमन्त्रस्य मात्रानियमः कथितः ॥

45*c*. हरिवंशध्यानम्.

Beginning:

श्रीहरिवंशे भगवद्ध्यानव्यञ्जकानि वचनानि तत्र श्रीभगवत्स्वरूपबोधकपरमगुरुवरनारदमहामुनिध्यानम् ॥

नारायणे तिष्ठति च नारदः प्रत्यदृश्यत ।
ज्वलितार्कप्रतीकाशो बालार्कसदृशेक्षणः ॥ १ ॥
सुव्यावृत्तं सुविपुलं जटामण्डलमुद्वहन् ।
चन्द्रांशुशुक्ले वसने वसानो रुक्मभूषणः ॥ २ ॥
वीणां गृहीत्वा महतीं कक्षासक्तां सखीमिव ।
कृष्णाजिनोत्तरासङ्गो महायज्ञोपवीतवान् ॥ ३ ॥
दण्डी कमण्डलुधरस्साक्षाच्छक्रसखो मुनिः ।
मुद्रासमर्पितकरस्सुमनोवेष्टिताङ्गवान् ॥ ४ ॥
गाता चतुर्णां वेदानामुद्गाता प्रथमर्त्विजाम् ।
देवगन्धर्वलोकानामादिवेत्ता महामुनिः ॥

भगवन्तं प्रति चतुर्मुखवचनानि ॥

आत्मानमात्मना हि त्वमवतार्य महीतलम् ।
देवकीं रोहिणीं चैव गर्भाभ्यामभितोषय ॥

* * * *

End:

मनोरथं ममैतत्त्वं पूरयस्व जनार्दन ।
तथेत्येवाब्रवीत् कृष्णस्ततो मातरमात्मवान् ॥

46. तत्त्वदीपनिबन्धनम् - भागवतप्रकरणम्
(सटीकम्) - असमग्रम्.

Beginning :

श्रीभागवततत्त्वदीपनिबन्धने भागवतप्रकरणम् । भागवतप्रकरणं व्याचिख्यासुः तत्प्रतिपाद्यरुपं भगवन्तं सङ्कीर्तनेन स्तौति ॥ श्रीकृष्ण-मिति ॥

श्रीकृष्णं परमानन्दं दशलीलायुतं सदा ।
सर्वभक्तसमुद्धारे विस्फुरन्तं परं नुमः ॥ १ ॥

कृष्णशब्देन परं वस्तूच्यते । तदेव कदाचित्परमसौन्दर्यं स्वगतं प्रकटीकरिष्यामीति साकारं प्रादुर्भूतं सत् श्रीकृष्णः । अनेन विभूतित्वं निवारितम् । फलरूपतामाह । परमानन्दमिति । तस्य साधनं श्रवणमिति । * * * * *

स्वग्रन्थविषयमाह । शास्त्र इति ॥

शास्त्रे स्कन्धे प्रकरणेऽध्याये वाक्ये पदेऽक्षरे ।
एकार्थं सप्तधा जानन्नविरोधेन मुच्यते ॥ १ ॥

आनन्दस्य हरेर्लीलाशास्त्रार्थो दशधा हि सा ॥ २ ॥

भागवतार्थस्तादृशो वक्तव्यः ॥ * * *

तत्र प्रश्नद्वयं लोके सर्वदोपमृतिक्रमात् ॥ १३२ ॥

सर्वदा किं कर्तव्यं म्रियमाणेनेति कर्तव्यमिति ॥

इति -श्रीकृष्णद्वैपायनविष्णुस्वामिमतानुवर्तिवल्लभदीक्षित विरचिते तत्त्वदीपे भागवते प्रथमस्कन्धविवरणम् ॥

द्वितीयस्कन्धे स्कन्धार्थप्रकरणाध्यायार्थान् वक्तुं सङ्गत्यर्थं प्रथम-स्कन्धे सिद्धमर्थमनुवदति ॥ उत्तम इति ॥

उत्तमे चोत्तमश्रोतुः प्रश्न आद्ये निरूपितः ।
अध्यायदशकैस्तत्र साङ्गं श्रवणमीर्यते ॥ १ ॥

* * * *

इति श्रीवल्लभदीक्षितविरचितायां तत्त्वनिबन्धटीकायां द्वितीयस्कन्धविवरणम् ॥ * * * * *

एतद्धारणया देहं जलश्चक्रे महामतिः ।
अवतारचरित्रत्वाच्छ्रवणे फलमुच्यते ॥ १०६ ॥

इति श्रीविष्णुस्वामिमतवर्तिवल्लभविरचिते तत्वदीपे भागवते तृतीयस्कन्धविवरणम् ॥

स्वस्य स्त्रीत्वात् गुरोश्च सरस्वतीरूपत्वात् तिर्यग्गतावपि जलं धारणैव कृता ॥ * *

इति श्रीतत्वदीपे भागवतप्रकरणे वल्लभदीक्षितविरचिते तृतीयस्कन्धविवरणम् ॥ * * * *

अतोऽत्र विदुरस्तुष्टो भजनार्थं विनिर्गतः ।
अपकार्युपकारश्च करणान्निर्मलो मतः ॥ ११८ ॥

इति श्रीविष्णुस्वामिमतवर्तिश्रीवल्लभविरचिते तत्त्वदीपभागवते चतुर्थस्कन्धविवरणम् ॥

आचार्यवान् पुरुषो वेदेति शास्त्रार्थसिद्धय इत्यर्थः ।

* * * *

इति श्रीवल्लभदीक्षितात्मजविठ्ठलदीक्षितविरचितायां श्रीभागवततत्वदीपिकायां श्रीभागवतीयचतुर्थस्कन्धप्रकरणम् ॥ श्रीकृष्णः शरणं मम ॥

* * * *

End:

अतः प्रसङ्गिनं प्राह मानतो ह्यतिदेशतः ॥ १३९ ॥

एतेन हीत्यनेन सामान्यतो दिवो मानमुक्तं यद्यपि तथाप्यन्यस्य विभाजकस्य वक्तुमशक्यत्वाद्विशेषतस्तन्निरूपणं सूर्यगतिविशेषनिरूपणं विना न भवति यतोऽतो हेतोः ॥ * * * * * * *

46a. भागवतसुबोधिनी.

वल्लभदीक्षितविरचिता.

Beginning:

वन्दे श्रीकृष्णदेवं मुरनरकभिदं वेदवेदान्तवेद्यं
लोके भक्तिप्रसिद्ध्यै यदुकुलजलधौ प्रादुरासीदपारः ।
यस्यासीद्रूपमेव त्रिभुवनतरणे भक्तिवच्च स्वतन्त्रं
रूपं शास्त्रं च लोके प्रकटयति मुदा यस्सनो भूतिहेतुः ॥
कर्ता ज्ञस्सकलस्य यो निगमभूः सर्वस्वरूपोऽपि सन्
सर्वस्यापि विधारणे विजयते निर्दोषसर्वेष्टदः ।
यो लीलाभिरनेकधा वितनुते रूपं निजं केशवः
सोऽयं वाचि ममास्तु पूर्णगुणभूः कृष्णावतारः पतिः ॥
श्रीमद्वल्लभविद्वदीशविलसद्वंशाब्धिपूर्णेन्दवे
श्रीगोपीपतिवन्दिने सुमनसि ब्रह्मामृतस्यन्दिने ।
श्रीमल्लक्ष्मणभद्रसूरिरिति यन्नामाखिलाभीष्टदं
तस्मै तातमहाशयाय हरये कुर्मो नमः सिद्धये ॥
श्रीमद्भागवतागमस्सुरतरुर्लोके फलत्वं गतो
भाषाभेदविभेदतस्त्वयमपि स्यान्नो विरोधं महत् ।

भक्त्यंशे फलनाप्रमाणतुबले वेदत्वमर्थे पुनः
स्कन्धैर्द्वादशभिर्युतस्सुरतरुश्शाखाद्विवन्हिद्वयम ॥
अर्थं तस्य विवेचितुं न हि विभुर्वैश्वानराद्वाक्पते
रन्यस्तत्र विधाय मानुषतनुं मां व्यासवच्छ्रीपतिः ।
दत्वाज्ञां च कृपावलोकनपटुर्यस्मादतोऽहं मुदा
गूढार्थं प्रकटीकरोमि बहुधा व्यासस्य विष्णोः प्रियम् ॥
लक्षणन्नैव वक्ष्यामि परोक्षकथनादृते ।
अविरोधेन सप्तानामर्थानामिह संगतिः ॥
उत्तरोत्तरदौर्बल्यं वाच्यसङ्कोचतः परम ।
भाषात्रयाविरोधश्च कल्पभेदसमाहितः ॥
भाषात्रयविभेदश्च लक्षणैर्ज्ञाप्यने पुनः ।
अर्थत्रयं तु वक्ष्यामि निबद्धेऽस्ति चतुष्टयम ॥
अत्र सन्तः स्वसन्तोषे राज्ञां यच्छन्तु सिद्धये ।

अथ व्याख्या ॥ भगवदाज्ञया भक्तिजनिकां संहितामारभमाणः शिक्षार्थं मङ्गलमाचरन् बीजभावेन प्रथमं गायत्र्यर्थमुपनिबबन्ध ॥

जन्माद्यस्येति ॥ अत्र हि श्लोकत्रयस्य सङ्गतिः कथारूपं हि भगवन्तम् तत्तु नैमिष इत्यादिना निरूप्यते ॥ तत्रोच्यते ॥

यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः ।
वृत्रासुरवधोपेतं तद्भागवतमिष्यते ॥

End :

बादरायणिरिति ॥ अन्यथा व्यासस्य भागवतकरणं व्यर्थं स्यात् ॥ अतः शरीरजात उत्पन्नमिति तन्निष्कृत्यर्थमप्युक्तवानित्यर्थः । एवमुत्तरावधि कृत्यं प्रथमस्कन्धे निरूपितमिति ॥

आद्यस्कन्धस्य विवृतिः श्रीकृष्णचरणाम्बुजे ।
निवेदितातियत्नेन वाक्पुष्पाञ्जलिरुज्ज्वला ॥

सुज्ञेषु हस्तयुगलं पुरतो निधाय
विज्ञापयामि मुरवैरिपदाब्जनिष्ठः ।
उच्छृङ्खलापि विवृतिर्मम चिन्तनीया
श्रीकृष्णपादयुगले विनिवेशितेति ॥

Colophon :— इति श्रीभागवतसुबोधिन्यां श्रीवल्लभदीक्षितविरचितायां प्रथमस्कन्धे आधारलीलायां उत्तमाधिकारिप्रकरणे एकोनविंशाध्यायविवरणम् ॥ श्रीरस्तु ॥ श्रीकृष्णःशरणं मम ॥

46*b*. भागवतसुबोधिनी वल्लभदीक्षितविरचिता
कौतुकलीलायां प्रथमोध्यायः

Beginning :

कथामात्रं हरेर्वाच्यं सर्वत्रेत्यत्र केचन ।
कथां वक्तुं भागवतीं क्वचित्सिद्धामलौकिकीम् ॥
योजयित्वा त्वाधुनिका अध्यायत्रितयं जगुः ।
शब्दार्थसङ्गतीनां हि स्पष्टा तत्र विरुद्धता ॥
लोकप्रसिद्धेस्तच्चापि कथंचिद्रूप्यते स्फुटम् ।
पूर्वाध्यायान्ते कौमारं जहतुरित्युक्तम् ॥
ततश्च पौगण्डवयश्रितौ व्रजे बभूवतुस्तौ पशुपालसम्मतौ ॥

इत्येवं सन्दर्भस्तथापि भगवच्चरित्रमिव वत्साहरणं पद्मपुराणे प्रसिद्धमिति तां कथामाश्रित्याघासुरवधं ब्रह्मस्तुतिं पूर्वापरयोर्निवेश्य कौतुकलीला भगवतः प्रदर्शिता लोका हि लौकिके कौतुकिनो भवन्ति ॥ कारिका ॥

तत्र तु प्रथमाध्याये लीलामाह सुविस्तरात् ।
अघासुरस्य च वधं मुक्तिश्चापि स्वयुक्तितः ॥

प्रथमं भगवतो दशभिः श्लोकैः लीलामाह क्वचिदिति ॥

क्वचिद्वनाशाय मनोदधद्व्रजात्
प्रातस्समुत्थाय वयस्यवत्सपान् ।
प्रबोधयन् श्रृङ्गरवेण चारुणा
विनिर्गतो वत्सपुरस्सरो हरिः ॥ 1 ॥

क्वचित् कदाचित् वनाशाय अशनमाशः वने अशनं कर्तुं मनो दधत् बिभ्रत् प्रातःकाले व्रजात् उत्थाय विनिर्गत इति संबन्धः ॥ * * * * *

इति श्रीवल्लभाचार्यविरचितसुबोधिन्यां दशमस्कन्धे निरोधलीलान्तर्गतकौतुकलीलायां प्रथमाध्यायविवरणं समाप्तम्.

कल्यब्दः 4963 दुर्मतिनामसंवत्सरे सिंह्ममासि द्वादशदिने विठ्ठलदासेन शालिवाटिपुर्यां लिखित्वा समाप्तम् (समापयत्).

वणिङ्मुनिनृपाः वैश्यब्राह्मणक्षत्रियश्रेष्टाः ते निर्गम्य पण्यात्मदेशान् प्राप्तवन्तः तदाह अर्थान् प्रपेदिरे इति अर्थशब्दोहि लोके प्रसिद्धो वक्तव्यः * * * * कालप्राधान्यार्थमागत इति एवं सलीला शरद्वर्णिता ॥

इति श्रीमद्भागवतसुबोधिन्यां श्रीमल्लक्ष्मणभट्टात्मजवल्लभदीक्षितविरचितायां दशमस्कन्धविवरणे सप्तदशाध्यायविवरणम् ॥

46*c*. भागवतसुबोधिनी.

Beginning:

नवमे पञ्चकन्यानां विद्यापर्वस्वरूपतः ।
विवाहः प्रोच्यते सम्यक् कृष्णेनाशेषमुक्तये ॥ 1 ॥

मायासंबन्धदोषेण क्रोधः कामस्तथापरः ।
निराकृतः सर्वमुक्त्यै विद्याफलमतः परम् ॥
त्रैलोक्यसुखदानं च मायादोषनिवारणम् ।
द्वाभ्यां तथैव सर्वेषां राजसे पूर्णता ततः ॥
विद्यायाः सूर्यमुख्यत्वात्प्रथमा दुहिता रवेः ।
विपक्षो निग्रहात्मत्वाद्वितीया सोमवंशजा ॥
मार्गद्वयहितार्थाय द्वयं स्वीकृतवान् हरिः ।
भक्तानभक्तानालक्ष्य तृतीया सूर्यवंशजा ॥
भक्तिरूपा प्रयत्नेन याचयित्वा स्वयं गतः ।
व्यसनानि निराकृत्य तदुद्वाहं चकार ह ॥
अग्रे बाधास्तु भक्तेन ह्यर्जुनेन निराकृताः ।
ज्ञानभक्त्योरतो भूयान् पर्वणोरुद्यमः कृतः ॥
धर्मस्नेहौ तयोरङ्गे मध्यमो लौकिकः स्मृतः ।
द्वयोः सान्त्वनासिद्धौ जीवानान्तु ततो द्विधा ॥
भक्तिज्ञानफले कृष्णः पुंसां स्त्रीणाञ्चकार ह ।
अतो दत्तां स्वयं दत्तां अक्लेशक्लेशभावनात् ।
उपयेमे स्वयं कृष्णः तासु सर्वं प्रतिष्ठितम् ॥
ततः सर्वकलाभिस्तु हरिः पूर्णो निरूप्यते ।
स षष्ठो भगवानेव निःसन्दिग्धो निरूपितः ॥

तत्र प्रथमविवाहे तत्त्वानि भगवांश्च व्यापृत इति नवविंशतिश्लोकैः विवाहो निरूप्यते तत्र भक्तिकर्मणी ज्ञाने अङ्गभूते इति निरूपयितुं द्वादशभिः भक्तिं पञ्चभिः कर्म च निरूपयति । ततो भक्तिद्वारा दशभिस्तद्ग्रहणं प्रसङ्गाद्भक्तोपकारश्च भक्तोद्धारार्थं यतमान एव ज्ञानशक्तिं

गृह्णानीति वक्तुं पाण्डवानां स्थाने भगवान् गत इत्याह ॥ श्रीशुक उवाच ॥ एकदेति ॥

* * * *

इति भागवतसुबोधिन्यां दशमस्कन्धोत्तरार्धे नवमाध्यायविवरणम् ॥

* * * *

इति श्रीभागवतसुबोधिन्यां दशमस्कन्धोत्तरार्धे चतुस्त्रिंशाध्यायविवरणं समाप्तम् ॥

* * * *

कर्मणा कर्मनिर्हारः एष साधु निरूपितः ।
यच्छ्रद्धया यजेद्विष्णुं सर्वयज्ञेश्वरं मखैः ॥ 35 ॥

आदौ प्रकारमाहुः कर्मणा कर्मनिर्हार एष अग्रे वक्ष्यमाणः सर्वैरेव सिद्धान्तिभिः साधु निरूपित इति प्रमाणं स कः प्रकार इत्याकाङ्क्षायामाह ॥

46*d*. भागवतसुबोधिनी दशमस्कन्धव्याख्या.

Beginning:

नमःश्रीकृष्णपादाब्जतलकुङ्कुमपङ्कयोः ।
रुचे यदरुणं शश्वन्मामकं हृदयाम्बुजम् ॥

पितृपदसरसिजनतितविनिहतविश्वाशुभैर्निरोधस्य ।
विवृतौ संशयवंशच्छेदश्रीविठ्ठलैःक्रियते ॥

दशमस्कन्धविवरणं चिकीर्षवोऽत्र स्कन्धार्थरूपोऽपि भगवानेवेति ज्ञापनाय तद्रूपं तन्नमस्यन्ति नमामीति ॥

निरोधोऽस्यानुशयनमात्मनस्सहशक्तिभिरिति वाक्यात्तद्रूपं तं विष्ण्वन्तो यथा नारायणो दास्योपयोगिशय्यादिसर्वार्थरूपत्वेन प्रभोःशेषभावं प्राप्तत्वेन शेषरूपेऽस्मद्धृदय लीलाक्षीराब्धिस्तत्र शयनत्वेनान्यत्र गतिरहितो यस्तं नमामीत्यर्थः ॥ * * * *

वैराग्यजनकस्येति गुणानुवादे वैराग्यजनकस्येत्यर्थः दैत्यानां मुक्तिस्वरूपमाहुः अपुनरावृत्तिरिति ॥

पितामहीति श्लोकविवरणे पुण्यद्वारमात्रमिति अग्रे हि भगवान् साक्षादेव भक्तदुःखं निवारितवान् ।

* * * *

End:

एतदेवाहुः । लौकिकादिति लौकिकसजातीयत्वादुक्तभावस्य सर्वस्वमुच्यत इत्यर्थः ॥ सा वीक्ष्येत्यस्याभासोक्तौ अद्यापि तस्या.

46*e*. निरोधविवृतिः

Beginning:

श्रीगोवर्धनधारिणं शुभकरं शृङ्गारमूर्तिं भजे
वन्दे नन्दपुराणपुण्यफलितं श्रीबालकृष्णं प्रभुम् ।
श्रीमद्वल्लभविठ्ठलेश्वरविभू ध्यायामि सद्वन्दितौ
कुर्वे तत्कृपया निरोधविवृतौ सन्देहविध्वंसनम् ॥

अथ निरोधस्य स्कन्धार्थत्वात् प्रथमं तत्स्वरूपं विचार्यते तत्र निरोधोऽस्यानुशयनमात्मनस्सहशक्तिभिरिति वाक्यादात्मनः पुरुषोत्तमस्य शक्तिभिरनुशयनं निरोधः ॥

* * * *

End:

"नानृतं स्याज्जुगुप्सित" मिति वाक्यात् परकन्यापालनमसत्यवाक्यं नापि युक्तमेवेति ॥

Colophon:— श्रीमद्गोवर्धनधरश्रीवल्लभाचार्यश्रीविठ्ठलेश्वरचरणानुचरसेवकेन लालभट्टोपनामकबालकृष्णेन विरचितायां जन्मप्रकरणसुबोधिनीविषमपदयोजना पूर्णता सेयम् ॥

नत्वागोवर्धनाधीशं बालकृष्णं निजं प्रभुम् ।
श्रीवल्लभं विठ्ठलं च याचे भक्ति फलात्मिकाम् ॥

तामसप्रकरणारम्भे प्रथमकारिकायां राजसादिगुणैर्युतमिति राजसादिगुणैर्युतं सप्तसप्ततिभिः कृत्यमिति परेणान्वयः । राजससात्विकतामसभक्तानां गुणैर्भगवता सह भजनादिव्यवहारोपयोगिभिर्गुणैर्युतं हरेः कृत्यं सप्तसप्ततिभिरध्यायैर्निरूप्यत इत्यर्थः । अत्र क्रमो न विवक्षितः । तथा च तामसराजससात्विकभक्तानां निरोध्यानां गुणैर्युतं हरेः कृत्यं लीलातामसराजससात्विकप्रकरणैर्निरूप्यत इति प्रकरणत्रयार्थ उक्तः ॥ भगवान् स्वेन धर्मैश्चेति ॥

---

47. तत्वदीपप्रकाशः.

Beginning:

वन्दे श्रीवल्लभाचार्यानपारकरुणान्वितान् ।
स्वीयानां तत्वदीपेन स्वान्तध्वान्तनिवारकान् ॥

नन्दसूनुपदसौख्यदं नवं दुःखसङ्घदलनातिवैभवम् ।
श्रीमदग्निपदपङ्कजासवं भावयामि सततं नमामि च ॥

श्रीमद्वल्लभनन्दनपदपाथोजन्मरेणवस्ते मे ।
सन्तु कृपामधुभरिता दन्तुरमन्तुक्षमादक्षाः ॥

श्रीपरिवृढपदपङ्कजरैणवमेणीदृशा जुष्टम् ।
कुङ्कुमपङ्कमनारतमाप्तुमहं कामये दास्ये ॥
श्रीकृष्णसंवीतसुवर्णवर्णाम्बराभिधानोऽस्य कृपां दधानः ।
विवेचयन्नाशयमत्र तत्वदीपप्रकाशावरणं भनज्मि ॥

अथ श्रीमद्वल्लभाचार्यचरणाः सात्विकानुद्दिधीर्षवः प्रेक्षावतां प्रवृत्तिसिद्ध्यर्थं ग्रन्धस्य फलसम्बन्धत उपोद्घातं निरूपयन्तस्तत्वदीपविवरणं प्रतिजानते ।

सर्वोद्धारेत्यादिभिस्त्रिभिः सर्वोद्धाराय प्रयत्नो यस्य सर्वस्योद्धारो यस्मात्तादृशः प्रयत्नो व्यापारविशेषो यस्य.

* * * *

End:

अथार्थबलविचारेण तत्तद्बुभुत्सतां स्वतः प्रामाण्यवादिनामसंभावनाविपरीतभावनयोरुदयात्तदर्थं सर्वनिर्णय उच्यत इत्यर्थः फलतीति शुभम् ॥

इति हरिपदकुङ्कमतो भावितवसनस्य वल्लभीयस्य ।
श्रीमन्निबन्धविवृतौ शास्त्रार्थे विषमपदविवृतिः ॥

मुरनरकजराजक्लिष्टदेवेशराजव्यसनकषणराजद्राजलीलासमाजः ।
यदुपुरपुरुहूतो वामदेवाजनूतो निजपुरमिव पायादन्तरायादपायात् ॥

प्रलयजलदवृष्टेर्गोकुल्य(ल)स्यावनाय
स्वमृदुकरनखाग्रन्यस्तगोवर्धनाद्रेः ।
भगवत इह शक्त्या तत्वदीपप्रकाशा
वरणभरविभङ्गे प्रक्रियाद्या समाप्तोत् ॥

Colophon:— इति श्रीमद्वल्लभाचार्यचरणनखचन्द्रचान्द्रिकानिरस्तहार्दतमसस्तद्दासस्य यदुपतिसुतस्य पीताम्बरस्य कृतौ तत्वदीपप्रकाशावरणभरविभङ्गे शास्त्रार्थप्रकरणं संपूर्णम् ग्रन्थसङ्ख्या 3280.

इदं श्रीमुरलीधरदासचरणकमलपरागदासेन विठ्ठलदासेन रौद्रिसंवत्सरे कुम्भमासि प्रथमदिने संगवकाले शालिवाटिपुर्यां लिखित्वा समाप्तमभवत्.

भागवततत्त्वदीपप्रकाशावरणभङ्ग is the full name according to Ulwar Cat. p. 21. *Vide* Aufrecht p. 13.

---

48. भागवतसाहित्यमञ्जूषा.

Beginning:

अथ कदाचित् भगवद्दासइति व्यवहारमात्रं वस्तुतस्तु तद्दासः तद्वात्सल्यपात्रत्वेन प्रणयातिरेकात् स्वगुरुं विज्ञापयति ॥

हन्त देशिकमणे श्रीनिवासविलासादिस्वकृतग्रन्थेषु स्वाहङ्कारखण्डनार्थं कविमशकशिशुत्वेन व्यासस्य कविराजत्ववत् ख्यातोऽपि कविगजपञ्चानन इति ख्यातः। अस्य काव्यस्य कवयो न समर्था इति स्वोक्तेः श्रीमन्महाभारतकर्तृत्वेन व्यासस्य कविराजत्ववत् तत्कृतश्रीमद्भागवतस्यापि प्रायश उक्तत्वात् संहितात्वं ज्ञायते ॥ तथा काव्यत्वमपि सेत्स्यत इति चेत् सरसत्वेन सालङ्कारत्वेन निर्दोषत्वेन गुणवत्त्वेन सुपाकत्वेन शय्यासन्दर्भयुक्तत्वेन सुवृत्तिमत्त्वेन सुवृत्तित्वेन सुरीतित्वेन नगराद्यष्टादशवर्णनादिलक्षणलक्षितमहाकाव्यत्वेन किञ्चोपपाद्यसिद्धत्वेन भगवतो व्यासस्य कविराजेन्द्रत्वं स्फुटीभवेत्। तद्गुणवैशिष्येण च यस्य श्रवणपठनकीर्तनादिकर्तॄणामस्मदादीनां जन्म सफलं भवेत् ॥ इति गुरुः ॥ अरे वत्स त्वयोक्तं तत्प्रणीतमस्ति त्वयि गङ्गायात्रां गतवति अतो न पठितन्त्वया तर्हि श्रृणु सखे ॥

लक्ष्मीरसज्जनना च यं भजति भोः सा माधिना सत्कृतेः
निर्धूतापि च येन सत्सुरहितं चक्रे महापातकम्।

सोऽयं मेऽद्य गुरूडुपेन तरतो भक्त्या नरैर्नन्दितः
श्रीमद्भागवताम्बुधिं सुगहनं स्यात्कर्णधारो हरिः ॥

शिष्यः ॥ गुरो दुर्गमार्थत्वात् एतच्छ्लोकस्य भवदाज्ञयैव व्याकरिष्ये ॥ गुरुस्तथा क्रियतामिति ॥ श्रीमत्प्रह्लादाकण्टकण्ठीरवसूरिर्हि अन्तेवासिष्वन्यतमः भट्टवेङ्कटनामा श्लेषकविः श्रीमद्भागवते यत्किञ्चित्कृतपरिचयः अतिवृद्धदशाक्रान्तोऽपि मद्वात्सल्यतया स्वाधीतसाहित्यकलां सकलां स्वजन्मापि सार्थकयन् श्रीमद्भागवतस्थसलक्षण वृत्तादिसाहित्यसारानुद्धृत्य मञ्जूषां कर्तुकामः शिष्टाचारमनुसृत्यादौ मङ्गलमातनोति ॥ लक्ष्मीरिति ॥ लक्ष्मीः रमादेवी ॥ सज्जनता सज्जा सन्नद्धा नता नम्रा च सतीयं हरिं भजति ॥ * * *

* * * *

त्रिभाष्यं योऽनु इत्यादि भगवच्चरणोक्तेः सरसत्वेन सालङ्कारत्वेन निर्दोषत्वेन सगुणत्वेन सुपाकत्वेन सुवृत्तित्वेन सुरीतित्वेन सुवृत्तत्वेन शय्यासन्दर्भयुक्तत्वेन नगराद्यष्टादशवर्णनान्वितत्वेन च महाकाव्यलक्षणाक्रान्तत्वमप्यस्तीति तत्सर्वमत्रास्ति वृद्धदशाक्रान्तत्वेऽपि भगवद्भागवतानां प्रहृत्यै स्वविज्ञानानुसारेण स्फुटीकरिष्यामः ॥ कवित्वाद्व्यासस्य नायकत्वाच्छ्रीकृष्णादेः वाग्वृत्तेश्चतुर्विधपुरुषार्थप्रदत्वात् तेषां लोकोत्तरगुणोत्तरत्वेन विदुषां ब्रह्मादीनां कर्णावतंसत्वे को विचारः तच्चोक्तं। जगदद्य तद्भक्तकर्णावतंसमित्यत्रैव यैर्गुणैर्युक्तो नायको लोकोत्तरगुणोत्तरइत्युच्यते॥ गुणिवर्णनेन गुणवर्णनं स्वत एव सिध्यति । तथा हि यथाह दश रूपके ॥

नेता विनीतो मधुरस्त्यागी दक्षः प्रियंवदः।
रक्तलोकश्शुचिर्वाग्मी रूढवंशः स्थिरो युवा ॥

धृत्युत्साहस्मृतिप्रज्ञाकालमानसमन्वितः ।
शूरो दृढश्च तेजस्वी शास्त्रचक्षुश्च धार्मिकः ॥

इति तत्राद्यः। नेता नियामकः स च द्विविधः अन्तर्बहिश्चेति प्रथमो यथा॥ योऽन्तः प्रविश्य मम वाचमिमां प्रसुप्तामिति॥ द्वितीयो यथा।

निर्गत्य सदनात् कृष्णो वृष्णीनाहूय सर्वशः।
आज्ञापयामास तूर्णं चतुर्द्वारस्य पालने॥ इति

End:

ब्रह्मादयस्सुरगणा मुनयोऽथ सिद्धास्तुन्वन्ति सितातपत्रव्यजनै रुपस्कृतः। प्रसन्नवदनाम्भोज इत्यादिसौन्दर्यवान् कति वर्णयामीति वर्णयितुमशक्यः कोऽयं देवस्त्री वक्ति यस्मादेनं वर्णयसि तस्मात्त्वं धन्योऽसि एतादृगैश्वर्यं प्रत्यक्षन एव पश्यामि। एतेन कृष्णस्य प्रलयकालस्थितवासुकिदेवाभिन्नत्वमुक्तं अत एव मनोहरसञ्जल्पः देवस्त्रीपुरस्त्रीणामासीत् भगवत्स्वरूपत्वेन भगवत्प्रतिपादकत्वेन भगवत्कृतत्वेन सप्तदशपुराणैः प्रशस्यमानत्वेनास्य ग्रन्थस्य भागवतत्वं स्वत एव सिद्धमिति सर्वं सुमङ्गलम्॥

Colophon:— इति श्रीभागवतसाहित्यमञ्जूषा समाप्ता॥

श्रीभारतीरमणमुख्यप्राणान्तर्गतव्यासाय मङ्गलम्॥

जन्माद्यस्य - शार्दूलम्	वामबाहु - स्वागता
यं प्रव्रजन्तं - वसन्ततिलकम्	इति मतिरुप - पुष्पिताग्रा
तव वरद - मालिनी	जयति ते - परान्तिका नाम वैतालीयम्
उत्पत्य ध्वनि - मन्दाक्रान्ता	अतो महाभाग - वंशस्थम्
पुरा कल्पा - शिखरिणी	ते मय्यपेता - इन्द्रवंशम्
जयजय जह्य - नर्कुटकम्	नैष्कर्म्यमपि - उपजातिः
जगदुद्भव - मञ्जुभाषिणी	इदं हि विश्वं - उपजातिः
आशासाना - मत्तमयूरम्	गुर्वर्थे - स्रग्धरा
उत्पत्तिस्थितिलय - प्रहर्षिणी	

अजातशत्रोः प्रति - उपेन्द्रवज्रा-	अजातशत्रुः - कृतगाधा
किं वा कृपे - इन्द्रवज्रा	निगमकल्प - द्रुतविलम्बितम्
अविर्वसिष्ठा - उपजातिः	अयं ते कथा - भुजङ्गप्रयातम्
करोति कर्मा - उपजातिः	स्वागतं ते - स्रग्विणी
स वेद धातुः - उपजातिः	सवाग्विसर्गो
	शाब्दस्यहि

विठलदासेन कल्यब्दः 4985 सुभानुसंवत्सरवैशाखशुद्धपञ्चम्यां लिखितम् ॥

---

49. श्रीभागवतव्याख्या.

(वीरराघवीया).

Beginning :

पञ्चमस्कन्धे ॥ क्षेत्रज्ञतो न मिथ इत्यत्र जीवपरस्तस्यैव मनोधिष्ठातृत्वात् सङ्कोचविकासवद्धर्मभूतज्ञानाश्रयत्वाच्च । यद्वात्रापि परमात्मपर एव दैवञ्चैवात्र पञ्चममिति दैवस्य परमात्मनोऽपि सर्वत्रान्वयस्मरणात् ॥ क्षेत्रज्ञ एता मनसो विभूतिरित्यत्र क्षेत्रज्ञशब्दो न जीवपरः । किन्तु परमात्मपरः जीवस्येति पृथङ्निर्देशात् अविशुद्धकर्मकर्तुर्जीवस्य मनसः जीवाधिष्ठितमनसः मायारचिताः नित्याः प्रवाहतः ॥ न हि जीवः क्षेत्रं यादृग्यत्स्वरूपं तथा जानाति किन्तु ममेदमिति सामान्याकारेणात्मा प्रकृतिपुरुषयोरन्तःप्रविश्य नियन्तृत्वेन धारकः पुराणपुरुषः जगदादिकारणतया वर्तमानः साक्षात्स्वप्रकाशस्वरूपः न साक्षाच्छब्देन जीवतुल्यत्वव्युदासः न हि जीवस्वरूपं मन आदिभ्यो विविक्तं जीवदशायामवभासते मुक्तावस्थायामपि तदवभासस्य परमात्मप्रसादायत्तत्वात् निरुपाधिकक्षादवभासाभावात् ॥ * * * * * *

End :

भगवतो यो रुचिरोऽवतारः तस्य वीर्याणि वीर्यप्रकाशकानि चेष्टितानि बालचरितानि चेति शब्दात् पौगण्डकैशोरयौवनादिरचितानि शन्तमानि परममङ्गलावहान्यन्यत्र पुराणान्तरेषु इह चास्मिन्नपि श्रीभागवतपुराणे श्रुतान् गृणन् कीर्तयन् परमहंसानां गतौ स्वप्राप्त्युपायभूते परां भक्तिं लभेत प्राप्नुयादित्यर्थः ॥ एकादशस्कन्धस्समाप्तः ॥

---

50. भार्गवपुराणम्.

Beginning :

सर्वधर्मार्थतत्वज्ञ सर्वशास्त्रविशारद ।
तत्त्वार्थविदुषां श्रेष्ठ सूत द्वैपायनप्रिय ॥
यानि यानि च लोकेषु चरित्राण्यपि शार्ङ्गिणः ।
तव प्रसादादस्माभिः श्रुतानि वदतां वर ॥
कृतकृत्या वयं स्यामः पवित्रीकृतचेतसः ।
योगिनां तु चरित्राणि भगवद्दास्यभोगिनाम् ॥
नोक्तान्यमृतकल्पानि त्वया धर्मोपदेशिना ।
न तृप्तिं यान्ति चेतांसि तस्मात्तानि वदस्स(स्व)हः(नः) ॥

सूतः ॥

साधु पृष्टोऽस्मि मुनयः भवद्भिर्मोक्षकाङ्क्षिभिः ।
* * * *

वक्ष्यामि सर्वमेतद्वः श्रृणुध्वं (य)त्समाधिना ।
* * * *

बदर्याख्यं महापुण्यं स्मरणादेव मुक्तिदम् ।
* * * *

तस्मिन् दिव्याश्रमे रम्ये चन्द्रकान्तशिलातले ।
समासीनौ जगन्नाथनरनारायणावुभौ ॥

भूलोकजनरक्षार्थमवतीर्णौ महामुनी ।
नानाविधाः कथाः सर्वाः ब्रुवन्तावासतुस्तथा ॥

तस्मिन् काले महात्मानं नारायणमुनीश्वरम् ।
हर्षेण महता युक्तो नरो वाक्यमथाब्रवीत् ॥

नरः ॥

नारायण मुनिश्रेष्ठ त्वमेव शरणं मम ।
रहस्यं परिपृच्छामि लोकानां मुक्तिसिद्धये ॥

अस्मिन् मायामहावर्ते भ्रमन्ते जीवराशयः ।
तेषां प्रतिक्रिया नास्ति मुक्त्यर्थं सुलभं भुवि ॥

समस्तजीवकोटीनां मग्नानां भवसागरे ।
मोक्षमार्गस्तु सौलभ्यादस्तिचेदं (त्वं)वद प्रभो ॥

श्रुत्वा नरस्य तद्वाक्यमभिपूज्य महायशाः ।
तेन वाक्येन संहृष्टः प्रत्युवाच नरं हरिः ॥

नारायणः ॥

इममेव पुरा प्रश्नं वैकुण्ठनगरे हरिम् ।
सर्वेश्वरी जगन्माता पप्रच्छ कमलालया ॥

त्रिपाद्विभूतौ वैकुण्ठे विरजायाः परे तले ।
या देवानां पूरयोध्या ह्यमृतेनावृता पुरी ॥

मणिप्राकारपरिघा सान्द्रा मणिमयैर्गृहैः ।
हर्म्यैर्विमानैः प्रासादैस्तोरणैर्गोपुरैश्शुभैः ॥

तस्यामन्तः पुरवरं कोटिसूर्यसमप्रभम् ।

* * * *

कर्णिकायां समासीनो देवदेवो जनार्दनः ।
विश्वस्य पतिरात्मेशः श्रीमन्नारायणः प्रभुः ॥
श्रिया भूम्या च सहितो नीलया सह देवराट् ।
पद्माम्भोरुहसाहस्रदलाग्रेषु समाहितैः ॥
विमलाद्यैस्सहस्रैश्च चामरैः परिराजितः ।
नित्यैर्मुक्तैरनन्ताद्यैरनन्तैः परिसेवितः ॥
एवं स्थिते सदा देवे कदाचिद्विष्णुमीश्वरन् ।
पप्रच्छ कमला देवी सर्वजीवदयापरम् ॥
श्रीः ॥ त्वमेव सर्वलोकानां सर्गस्थित्यन्तकारणम् ।
चतुर्मुखश्शङ्करश्च तवाज्ञापरिपालकौ ॥
त्वत्कटाक्षवशादेव प्राप्तौ सृष्ट्यन्तकर्तृताम् ।
सर्वासां जीवकोटीनां द्विकर्मफलपक्कतः ॥
तारणार्थन्तु सृष्ट्यादीन् करोषि कृपया हरे ॥

* * * *

एवं संप्रार्थ्यमान(ां) तां श्रियं दृष्ट्वा जगत्पतिः ।
अत्यादरेण कृपया तामुवाच परात्परः ॥
लोके पितुर्दया मातुरधिकं हि प्रवर्तते ।
तस्माद्दयाधिका ते श्रीः जीवेषु मम नास्ति सा ॥
त्वदुक्तं सत्यमेवैतत् न मे भेदः कदाचन ।

* * * *

वर्तते यदिदं चोपायं वक्ष्यामि श्रूयतां त्वया ।
त्वञ्च भूमिश्च नीला च चक्रं शार्ङ्गश्च नन्दकः ॥
कौमोदकी पाञ्चजन्यो विष्वक्सेनो मम प्रियः ।
अनन्तो गरुडश्चैव कुमुदाद्या मम प्रियाः ॥

यूयं सर्वेशभागेन भूलोकेऽवतरिष्यथ ।
जनित्वा योगिवंशेषु नृणां सर्वाधिकारिणाम् ॥
सकृन्निष्ठावशादेव सुलभं मोक्षदं भुवि ।
रहस्योपनिषत्प्रोक्तं गुह्याद्गुह्यतमं शुभं ॥
परमं न्यासयोगं तं रहस्यत्रयसंस्थितम् ।
उपदेक्ष्यथ सर्वेषां सर्वबन्धविमुक्तये ॥
सर्ववर्णाधिकारार्थं संगृह्य निगमाशयान् ।
करिष्यथ प्रबन्धांश्च सङ्गृह्य निगमाशयान् ॥
करिष्यथ प्रबन्धांश्च भाषया द्राविडाख्यया ।
दुर्मतिच्छेदनं कृत्वा प्रबन्धैस्तैर्महागुणैः ॥
स्वाश्रितान् सात्विकान् कृत्वा मत्तत्वं बोधयिष्यथ ।
एवमाज्ञापिते देवे श्रीभूनीलादयस्तथा ॥
अनन्ताद्याः परिषदो वसुधायां प्रजज्ञिरे ।
जनित्वा सर्वदेशेषु हरिवाक्यानुसारतः ॥
सर्वेषामुपदिश्याथ न्यासयोगमनुत्तमम् ।
सरहस्यं महात्मानो मोक्षदा अभवन् भुवि ॥
एवं प्रतिद्वापरान्ते एते प्रतिमहायुगे ।
जायन्ते बहुधा भूमौ जनानां मुक्तिहेतवे ॥
तदुक्तं न्यासयोगं तं ये गृण्हन्ति जना भुवि ।
सकृत् गृहीतमात्रेण यान्त्येव परमां गतिम् ॥
तदारभ्य तु लोकेऽस्मिन् न्यासयोगः प्रकाशितः ।
वर्तते भगवद्भक्तिः सर्वेषां मुक्तिदो हरेः (रिः) ॥
एवं नारायणेनोक्तं वचश्श्रुत्वामृतोपमम् ।
नरः प्र(प्री) तिसमायुक्तः प्रणिपत्येदमब्रवीत् ॥

नरः॥ यत्र यत्र यथां लोके संजाता-नित्यमूरिणः ।
कथं वर्तन्ति? कुर्वान्ति कथं मुक्तिं दिशन्ति ते ॥
महाभागवतानां त्वं चरित्रमघनाशनम् ।
विस्तरेण ममाचक्ष्व परमं मोक्षसाधनम् ॥

इति श्रीमद्भार्गवे उपपुराणे उत्तरखण्डे नरनारायणसंवादे महायोगिमाहात्म्ये प्रथमोऽध्यायः.

* * * *

End:

इत्येतदाख्यानमनुत्तमं शुभं योगीश्वराणां महतां मनोहरम् ।
भक्त्या नरो यश्शृणुयात् पठेद्यः सौभाग्यवान् गच्छति (तत्परं पदम्)॥

Colophon:— इति श्रीमद्भार्गवे उपपुराणे उत्तरखण्डे नरनारायणसंवादे महायोगिमाहात्म्ये चत्वारिंशोऽध्यायः.

50*a*. यादवगिरिमाहात्म्यम् (नारदीयपुराणम्).

Beginning:

एकदा मुनयस्सर्वेऽप्येकान्तेन व्यवस्थिताः ।
प्रापुर्नारायणं देवं नरनारायणाश्रमे ॥
व्यासो वसिष्ठः कपिलो मार्कण्डेयश्च कश्यपः ।
अत्रिर्दक्षो भरद्वाजो विश्वामित्रश्च शौनकः ॥
गौतमो-जामदग्न्यश्च पुलस्त्यः कुम्भसम्भवः ।
वाल्मीकिर्वामदेवश्च वैशम्पायनभार्गवौ ॥
एते चान्ये च मुनयस्सर्वे विष्णुपरायणाः ।

* * * *

भगवन् देवदेवेश नमो नारायणाय ते ।
रक्षकस्त्वं हि विश्वस्य शेषी चासि श्रियःपते ॥

* * * *

भवन्तं शरणं प्राप्ता भवसन्तापहारिणम् * * *

इत्थं नानाविधैः स्तोत्रैः स्तुतः स पुरुषोत्तमः ।
उवाच मुनिशार्दूलानुरुभिर्वाक्यविस्तरैः ॥

End:

चरमचरमशेषं यत्पुरा वीक्ष्य निन्ये
परममपि पदं तत्पावनैरक्षिपातैः ।
यदुशिखरिनियन्तुस्तेन नित्यार्चिताङ्घ्रि
र्हरिणकुलमुमुक्षो हन्त तस्यैव शीक्षा ॥

मुनिवरगिरमेनामित्थमाकर्ण्य केचि
द्व्यधिषत यदुशैले वीतरागा निवासं ।
कतिचन सहसाद्यं धाम सम्प्राप्य विष्णो
रकृषतसहवासं शेषशेषासनाद्यैः ॥

Colophon :— इति श्रीनारदीयपुराणे ज्ञानकाण्डे श्रीमद्यादव-गिरिमाहात्म्ये भगवत्सन्दर्शनं नाम द्वादशोऽध्यायः ॥

Contents.

1.
2.
3.
4. भगवदागमनम्.
5. सुचरितोपाख्यानम्.

6. भगवद्वंशः.
7. हरिरातोपाख्यानम्.
8. चतुर्वेदिमोक्षणम्.
9. शाण्डिल्यपराशरसंवादः.
10. विष्णुचित्तोपाख्यनम्.
11. वासिष्ठपत्रमोक्षणम्.
12. भगवत्सन्दर्शनम्.

50*b*. गोवर्धनगिरिमाहात्म्यम् ॥

Beginning:

श्रीबहुलाश्व उवाच ॥

कथं दधार भगवान् गिरिं गोवर्धनं वरम् ।
उच्छिलीन्ध्रं यथा बालो हस्तेनैकेन लीलया ॥
परिपूर्णतमस्यास्य श्रीकृष्णस्यामलात्मनः ।
वदैतच्चरितं दिव्यमद्भुतं मुनिसत्तम ॥

श्रीनारद उवाच ॥

वार्षिक्यं हि करं राज्ञे यथा शक्रो त्तथा ।
बलिं ददुः प्रावृडन्ते गोपास्सर्वे कृषीवलाः ॥

* * * *

End:

यश्शृणोति गिरिराजयशस्यं गोपराजनवकेलिरहस्यम् ।
देवराज इव सोऽत्र शमेति नन्दराज इव शान्तिममुत्र ॥

Colophon:— इति श्रीमद्गर्गाचार्यसंहितायां श्रीगिरिराजखण्डे बहुलाश्वसंवादे श्रीगिरिराजप्रभावप्रस्तावर्वर्णनो(ने) सिद्धमोक्षात्मको नामैकादशोऽध्यायः ॥

TITLES OF THE 11 CHAPTERS.

1. श्रीगिरिराजप्रजाविधिवर्णनम्.
2. श्रीगिरिराड् महोत्सववर्णनम्.
3. गोवर्धनोद्धारणम्.
4. कृष्णाभिषेकवर्णनम्
5. गोपविवादः.
6. हरिपरीक्षणम्
7. गिरिराजतीर्थवर्णनम्.
8. गिरिराजविभूतिवर्णनम्
9. गिरिराजोत्पत्तिवर्णनम्.
10. गिरिराजमाहात्म्यवर्णनम्.
11. गिरिराजप्रभावप्रस्ताववर्णनम्.

---

51. वल्लभाचार्यचरित्रम्.

Beginning:

नत्वा श्रीविठ्ठलगुरुं गोपीनाथांशसम्भवम् ।
तत्पितुश्चरितं दिव्यं वर्णयामि यथाश्रुतम् ॥

अथ भगवान् पुण्डरीकदललोचनः पद्मासहायो व्रजसीमन्तिनीकुचकुङ्कुमाङ्कितवक्षस्थलो वनमालाविराजितो नवजलदश्यामो नन्दराजस्वनित्यलीलादर्शनार्हपुष्टिमार्गीयजीवान् स्वसेवामार्गप्रवेशनेन प्रेमभक्तिरसनिमग्नचित्तान् पुनर्मुरलिकाश्रवणेन स्वसमीपमानेतुं कलावप्युद्युक्तो मदनगोपालरूपस्वपूजापरायणस्य स्वेनैव भक्तिमार्गे भाविकार्यार्थं प्रवेशितस्य पूर्वतपोयुक्तस्यान्ध्रदेशीयस्य ब्राह्मणस्य लक्ष्मणभट्टस्य गृहे स्वयमेव श्रीवल्लभाचार्यात्मनावततार ॥ * * *

* * * *

End :

श्रीविठ्ठलनाथः स्वपुत्राणां सप्तानां श्रीगिरिधरगोविन्दरायरघुपति यदुपतिप्रभृतीनां श्रीनाथेन सह नवनीतप्रियाद्यष्टस्वरूपमपि दत्तवान् । सूरदासप्रभृतयस्सर्वेऽपि विठ्ठलनाथशिष्या एव व्रजवासिनां स्वसंप्रदाय-भक्तानां दृष्ट्वा व्रजनाथस्य विठ्ठलनाथस्यै(स्ये)षड्भेदस्याभावान्नित्यदा नारदस्तुतो मुरलीधर एव नारदेन सह स्वलीलातत्त्वं ममावबोधयन् विठ्ठलनाथात्मना विराजत इति सर्वं समञ्जसम् ॥

पुष्टिमार्गीयभक्तानां दासदासोऽस्मि नित्यदा ।
विठ्ठलेशप्रसादेन सेवामार्गरतस्तथा ॥
गोपीजनमनःकान्तो नित्यदा भासतां हृदि ।
प्रेमानन्दरसादीनामास्पदं नन्दनन्दनः ॥

श्रीकृष्णश्शरणं मम ॥

जयतां विठ्ठलाधीशो वल्लभाचार्यनन्दनः ।
पद्मपत्रेक्षणः श्रीमान् कस्तूरीतिलकाङ्कितः ॥
मङ्गलं विठ्ठलेशाय पुण्डरीकप्रियाय च ।
वनमालाधरायास्तु विष्णवे सर्वजिष्णवे ॥
श्रीहरिर्जयति ॥

---

52. चरकसंहिता. (Incomplete.)

Beginning :

अथातो दीर्घजीवितीयमध्यायं व्याख्यास्यामः इति हस्माह भगवानात्रेयः ॥ दीर्घजीवितमन्विच्छन् भरद्वाजउपागमत् ।

इन्द्रमुग्रतपो बुध्वा शरण्यममरेश्वरम् ।
ब्रह्मणा हि यथा प्रोक्तमायुर्वेदं प्रजापतिः ॥
जग्राह निखिलेनादावश्विनौ तं पुनस्ततः ।
अश्विभ्यां भगवानिन्द्रः प्रतिपेदे ह केवलम् ॥

ऋषिप्रोक्तो भरद्वाजः तस्माच्छक्र पा ात् ।
विघ्नभूता यदा रोगाः प्रादुर्भूताश्शरीरिणाम् ॥
तपोपवासाध्ययनब्रह्मचर्यव्रतायुषाम् ।
तदा भूतेष्वनुक्रोशं पुरस्कृत्य महर्षयः ॥
समेताः पुण्यकर्माणः पार्श्वे हिमवतः शुभे ।

*　*　*　*

इति चरके प्रथमोऽध्यायः ॥

अथातोऽपामार्गतण्डुलीयमध्यायं व्याख्यास्यामः ॥

*　*　*　*

इति चरके द्वितीयोऽध्यायः ॥

अथात आरग्वधीयमध्यायं व्याख्या स्यामः ॥

*　*　*　*

इति चरके तृतीयोऽध्यायः ॥

अथातः षड्विरेचनशताश्रितीयमध्यायं व्याख्यास्यामः ॥

*　*　*　*

मन्दानांव्यवहाराय बुद्धानां बुद्धिवृद्धये ।
पञ्चाशत्को ह्ययं वर्गः कषायाणामुदाहृतः ॥
सयोगं च प्रयोगं च यो भे(वे)द स भिषग्वरः ।
इत्याह भगवानात्रेयः॥

इति चरके चतुर्थोऽध्यायः ॥

अथातो मात्राशीतीयमध्यायं व्याख्या स्यामः ॥

*　*　*　*

End:

स्रवति स्रंसते स्नेहः तथा त्वरितसेवितः ॥
लवणोपहितास्नेहाः स्नेहयन्त्यचिरान्नरं ॥

---

53. सद्वैद्यजीवनम्.

Beginning :

प्रकृतिसुभगगात्रं प्रीतिपात्रं रमायाः
दिशतु किमपि धाम श्यामलं मङ्गलं नः ।
अरुणंकमललीलां यस्य पादौ दधाते
प्रणतहरजटाली गाङ्गलिङ्गत्तरङ्गे ॥

रत्नं वामदृशादृशां-सुखकरं श्रीसप्तश्रृङ्गास्पदम्
स्पष्टाष्टादशबाहु तद्भगवतो भर्गस्य भाग्यं भजे ।
यद्भक्तेन मया घटस्तनतटीमध्ये समुत्पाद्यते
पद्यानां शतमङ्गनाधरसुधा·स्पर्धाविधानोद्धतः ॥

दिवाकरप्रसादेन रोगारोग्यसमीहया ।
समासेन तयोः कुर्मः काव्यं सद्वैद्यजीवनम् ॥

तथापि क्रियते ग्रन्थः सन्ति यद्यपि दुर्जनाः ।
न हि दस्युभयाल्लोके दैन्य वर्तते ॥

येषां न चेतो ललनासु लग्नं
मग्नं न साहित्यसुधासमुद्रे ।
ज्ञास्यन्ति किं ते तु महाप्रयासा
नन्धा यथा वारवधूविलासम् ॥

* * * *

End :

आयुर्वेदविचारकारिसमये धन्वन्तरिः केवलम्
सीमागानविदां दिवाकरसुधाम्भोधिक्षपानायकः ।
उत्तंसः कविताकृतां मतिमतां भूभृत्सभाभूषणम्
कालोक्त्याकृत वैद्यजीवनमिदं लोलम्बराजः कविः ॥

सुरतरुरिव दाता पुष्पधन्वेव रम्यः
सुरगुरुरिव वेत्ता साधूनामग्रगण्यः ।
गदगणमपहर्तुं ग्रन्थमेकं व्यधत्त
स्थगितकविसमाजो लोललोलम्बराजः ॥

Colophon :—इति श्रीलोलम्बराजविरचिते सद्वैद्यजीवने पञ्चम-उल्लासः ॥

---

54. प्रश्नोत्तररत्नमाला.

Beginning :

श्रीमान् दन्तिमुखो देवः श्रेयांसि विदधातु वः ।
यत्प्रसादेन निर्विघ्नं सिध्यन्ति कृतिनां क्रियाः ॥

एकाम्रनाथो यत्तातः सायणामात्यचोदितः ।
समग्रहीत्सुबोधार्थमायुर्वेदसुधानिधिम् ॥

सरस्वतीभूषणं तमायुर्वेदाब्धिपारगम् ।
वन्दे कामेशनाथार्यं गुरुं काश्यपगोत्रजम् ॥

अत्रिगोत्राब्धिचन्द्रस्य स्वादुसूक्तिसुधामुचः ।
तुण्डीरमण्डलाक्रान्तमक्षिकारण्यजन्मनः ॥

सुविस्तीर्णायुराम्नायसारसङ्ग्रहकारिणः ।
अवधानसरस्वत्याः पुत्रेण ब्रह्मवेदिना ॥

तस्य कामेशनाथस्य शैवागममहानिधेः ।
दौहित्रेण च शिष्येण वेददीक्षामृतात्मना ॥

मतिमन्थाद्रिविभुना संग्रहे सम्प्रदायिना ।
प्रश्नोत्तरादिमा रत्नमाला सङ्ग्रथिताभवत् ॥

गम्भीरनिजगर्भस्य सूत्रवृत्तिः प्रकाशिता ।
धार्यतां महितारोग्यहृदयेन भिषक्तमैः ॥
मतिमन्थात् प्रमथितसर्वायुर्वेदसिन्धुसारमयी ।
श्रीवेङ्कटाद्रिविभुना प्रश्नोत्तररत्नमालिका ग्रथिता ॥
दोषश्चेदिह यद्यपि भिषजामङ्गीकारेण सगुणतां भजते ।
यत्तेषामनुभावाद्विषमपि जीवातुतामेति ॥

*　*　*　*

End:

दानशीलदयासत्यब्रह्मचर्यकृतज्ञता : ।
रसायनानि मैत्रीं च पुण्यायुर्वृद्धिकर्मणः ॥
भिषजां साधुवृत्तानां भद्रमागमनालसाम् ।
अभ्यस्तकर्मणां भद्रं भद्राभिभाषिणाम् ॥
इति श्रीशैलनाथविरचिता प्रश्नोत्तररत्नमाला संपूर्णा ॥

54*a*. नृत्ततालकपूर्तनम्. (आन्ध्रटीकासहितम्.)

Beginning:

आङ्गिकं भुवनं यस्य वाचिकं सर्ववाङ्मयं ।
आहार्यं चन्द्रतारादि तन्नुमस्सात्विकं शिवम् ॥
शिवप्रसादे संप्राप्ते निस्सीमज्ञानचक्षुषा ।
तन्यते शार्ङ्गदेवेन नृत्ततालकपूर्तनम् ॥

*　*　*　*

सदाशिवश्शिवो ब्रह्मा भरतः कश्यपो मुनिः ।
मतङ्गो याष्टिको दुर्गा शक्तिश्शार्दूलकोहलौ ॥
विशाखको दन्तिलश्च कम्बलोऽश्वतरस्तथा ।
वायुर्विश्वावसूरम्भार्जुनौ नारदतुम्बुरू ॥

आञ्जनेयो मातृगुप्तो रावणो नन्दिकेश्वरः ।
श्वतिर्गणो देवराजः क्षेत्रपालश्च लोहलः ॥
रुद्रसेनोऽनन्यचोलो भोजभूवल्लभस्तथा ।
वेदव्यासश्च सोमश्च जग(य)देवमहीपतिः ॥
प्रभाकरो भारतीयो लोल्लटोद्भटशङ्कराः ।
भट्टोऽभिनवगुप्तश्च श्रीमत्कीर्तिधरः पुरः ॥
अन्ये च बहवः पूर्वे ये सङ्गीतविशारदाः ।
अगाधबुद्धिधाराणां तेषां मतपयोनिधिम् ॥
निर्मथ्य शार्ङ्गदेवस्तु साराधारमिदं व्यधात् ।
भूमिरूपं चतुष्कोणं पीतवर्णसमान्वितम् ॥
लकारबीजसंयुक्तं ब्रह्मा तस्याधिदेवता ।
चराचरधरा देवी सर्वाधारस्वरूपिणी ॥
पञ्चाशत्कोटिविस्तीर्णं योजनस्त्ववनेःक्रमः ।
आधारशक्तेरुपरि कूर्मपृष्ठे प्रतिष्ठितम् ॥
अनन्तपीठमारूढे भूमिदेवि नमोऽस्तु ते ।
विष्णुशक्तिमहाभूमिं शङ्खवर्णमहीतले ॥
अनेकरत्नसंभूमिश्रीभूमिं संश्रयाम्यहम् ।

* * * *

End:

एकेन जगणेनैव मठतालः प्रकीर्तितः ॥
अभङ्गास्येति वा स्यातां रसज्ञैः पूर्वसूरिभिः ॥
ताले चञ्चत्पुटे ज्ञेयं गुरुद्वन्द्वं लघुप्लुतम् ॥
व्यञ्जनं लघुसंयुक्तं रूपके परिकीर्तितः ॥

EXTRACTS

FROM

TAMIL MANUSCRIPTS.

1. தொல்காப்பியம்—2. இளம்பூரணருரை.

சொல்லதிகாரம்.

1.—கிளவியாக்கம்.

Beginning:

> *உயர்திணையென்மனார் மக்கட்சுட்டே*
> *யஃறிணையென்மனா ரவரலபிறவே*
> *யாயிருதிணையி னிசைக்குமன்சொல்லே.*

என்பது சூத்திரம்.

இவ்வதிகாரஞ் சொல்லிலக்கண முணர்த்தினமை காரணத்தாற் **சொல்லதிகாரம்** *என்னும் பெயர்த்து.* **சொல்லென்பது** - *எழுத்தொடு புணர்ந்து பொருளறிவுறுக்குமோசை. அதிகாரமென்பது-முறைமை.*

மற்றச்சொல் லெனைத்துவகையா னுணர்த்தினானோவெனின்,—எட்டுவகைப்பட்ட விலக்கணத்தா னுணர்த்தினானென்க. அவையாவன, இரண்டுதிணைவகுத்து, அத்திணைக்கண் ஐந்துபால்வகுத்து, எழுவகை வழுவகுத்து, எட்டுவேற்றுமைவகுத்து, ஆறொட்டுவகுத்து, மூன்றிடம் வகுத்து, மூன்றுகாலம்வகுத்து, இரண்டிடத்தானாராய்தல்.

இரண்டு திணையென்பன—*உயர்திணையு மஃறிணையும்.* **ஐந்துபாலென்பன**—*ஒருவ னொருத்தி பலர் ஒன்று பல.* **எழுவகை வழுவென்பன**—*திணைவழு, பால்வழு, இடவழு, காலவழு, செப்புவழு, வினாவழு, மரபுவழு எனவிவை.* **எட்டுவேற்றுமையாவன**—*பெயர், ஐ, ஒடு, கு, இன், அது, கண், விளி எனவிவை.* **அறுவகையொட்டாவன**—*வேற்றுமைத்தொகை, உவமத்தொகை, வினையின்றொகை, பண்பின்றொகை, உம்மைத்தொகை, அன்மொழித்தொகை எனவிவை.* **மூன்றிடமென்பன**—*தன்மை, முன்னிலை, படர்க்கை எனவிவை.* **மூன்றுகாலமென்பன**—*இறந்தகாலம், எதிர்காலம், நிகழ்காலம் எனவிவை.* **இரண்டிடமாவன**—*வழக்கிடம், செய்யுளிடம் எனவிவை.*

இனி இவ்வதிகாரத்து முதற்கணோத்து என்னபெயர்த்தோவெனின்,—கிளவிகள் பொருண்மேலாமாறுணர்த்தினமையின் **கிளவியாக்கம்** *என்னும்பெயர்த்து.*

*   *   *   *

2.—வேற்றுமையியல்.

வேற்றுமைதாமே யேழெனமொழிப.

என்பது சூத்திரம்.

இவ்வோத்தென்ன பெயர்த்தோவெனின், வேற்றுமையெனப்பட்ட சில பொருளுணர்த்தினமையின் **வேற்றுமையோத்து** என்னும்பெயர்த்து.

மேலோத்தினுள் நால்வகைப்பட்ட சொற்களையும் பொருள்கண் மேலாமாறு கூறிப்போந்தார் அவற்றுண் முதலது பெயர்ச்சொலதனதிலக்கணமுணர்த்திய வெடுத்துக்கொண்டார். இது மேலோத்திேனாடியைபெங்ஙனமுணர்த்திறுனுவெனின், பயனிலைசெப்பலு முருபேற்றலுங் காலந்தோன்றாமையும் பெயரதிலக்கணமென வுணர்த்திறுனென்பது.

மற்றித்தலைச்சூத்திரமென்னுதலிற்றோவெனின், தன்னாலுணர்த்தப்படும்பொருளை யினைத்தென்று வரையறுத்த னுதலிற்று.

வேற்றுமையென்று சொல்லப்படுவன வெழுவகைய, எ-று.

இவ்வேற்றுமைகள் பொருள்களை வேற்றுமைசெய்யுமாறவற்றவற்றுச் சிறப்புச்சூத்திரத்தானறிக.

* * * *

3.—வேற்றுமை மயங்கியல்.

கருமமல்லாச் சார்பென்கிளவிக்
குரிமையுமுரித்தே கண்ணென்வேற்றுமை.

என்பது சூத்திரம்.

இவ்வோத் தென்னபெயர்த்தோவெனின், வேற்றுமை தம்மின் மயங்கினமை யுணர்த்தினமையின் **வேற்றுமை மயங்கியல்** என்னும் பெயர்த்து.

இத்தலைச் சூத்திர மென்னுதலிற்றோவெனின், இரண்டாவததேனாடேழாவது மயங்குமாறுணர்-ற்று.

இரண்டாவது கருமச்சார்புங் கருமமல்லாச்சார்பு மென விருபொருளுடைத்து.

'தூணைச்சார்ந்தான்' என்பது கருமச்சார்பாவது, அதனையுறச்சாரு மாதலால். இனி, 'அரசரைச்சார்ந்தான்' என்பது கருமமல்லாச்சார்பு.

அக்கருமமல்சார்ச்சிப்பொருண்மைக்கண் ஏழாவதுவருதலுரிமையுடைத்தென்பது.

உ-ம்.—'அரசரைச்சார்ந்தான்' என்புழி, 'அரசர்கட்சார்ந்தான்' என்பதுமாகவென்பது.

* * * *

4.—விளிமரபு.

விளியெனப்படுப கொள்ளும்பெயரொடு
தெளியத்தோன்று மியற்கையவென்ப.

என்பது சூத்திரம்.

இவ்வோத்தென்ன பெயர்த்தோவெனின், விளிவேற்றுமையதிலக்கணமுணர்த்தினமையின் **விளிமரபு** என்னும்பெயர்த்து.

இனி இத்தலைச்சூத்திரமென்னுதலிற்றோவெனின், விளிவேற்றுமையதிலக்கணமுணர்-ற்று.

